दशमविलासः

श्रीकृष्णचरणाम्भोजमधुपेभ्यो नमो नमः।
कथञ्चिदाश्रयाद्येषां श्वापि तद्गन्धभाग्भवेत्॥ १॥
अथ श्रीकृष्णभक्तानां सभां सविनयं शुभाम्।
गच्छेद्वैष्णवचिह्नाढ्यः पातुं कृष्णकथासुधाम्॥ २॥

तथा च स्मृतिः
इतिहासपुराणाभ्यां षष्ठसप्तमकौ नयेत्॥ ३॥

अथ श्रीभगवद्भक्तानां लक्षणानि
सामान्यतः लैङ्गे
विष्णुरेव हि यस्यैष देवता वैष्णवः स्मृतः॥ ४॥

अत्र विशेषः
व्रतकर्मगुणज्ञानभोगजन्मादिमत्स्वपि।
शैवेष्वपि च कृष्णस्य भक्ताः सन्ति तथा तथा॥ ५॥

अत्र व्रतिषु मध्ये भगवद्भक्तिहेतुव्रतपरता भगवद्भक्तलक्षणम्

तथा स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे
दशमीशेषसंयुक्तं दिनं वैष्णववल्लभम्।
नोपासते महीपाल ते वै भागवता नराः॥ ६॥
प्राणात्यये न चाश्नन्ति दिनं प्राप्य हरेर्नराः।
कुर्वन्ति जागरं रात्रौ सदा भागवता हि ते॥ ७॥
उपोष्य द्वादशीं शुद्धां रात्रौ जागरणान्विताम्।
अल्पां तु साधयेद्यस्तु स वै भागवतो नरः॥ ८॥
भक्तिर्न विच्युता येषां न च्युतानि व्रतानि च।
सुप्रियः श्रीपतिर्येषां ते स्युर्भागवता नराः॥ ९॥

कर्मिषु भगवदर्पणादिना तदाज्ञाबुद्ध्या वा भक्तिहेतुः सदाचारपरता।
धर्मार्थं जीवितं येषां सन्तानार्थं च मैथुनम्।
पचनं विप्रमुख्यार्थं ज्ञेयास्ते वैष्णवा नराः॥ १०॥
अध्वगं तु पथि श्रान्तं कालेऽत्र गृहमागतम्।
योऽतिथिं पूजयेद्भक्त्या वैष्णवः स न संशयः॥ ११॥
सदाचाररताः शिष्टाः सर्वभूतानुकम्पकाः।

शुचयस्त्यक्तरागा ये सदा भागवता हि ते ॥ १२ ॥

पाद्मे वैशाखमाहात्म्ये श्रीनारदाम्बरीषसंवादे (5.94.8)
जीवितं यस्य धर्मार्थं धर्मो हर्यर्थमेव च ।
अहोरात्राणि पुण्यार्थं तं मन्ये वैष्णवं भुवि ॥ १३ ॥

लैङ्गे च
विष्णुभक्तिसमायुक्तान्श्रौतस्मार्तप्रवर्तकान् ।
प्रीतो भवति यो दृष्ट्वा वैष्णवोऽसौ प्रकीर्तितः ॥ १४ ॥

गुणवत्सु भक्तिहेतुः कृपालुत्वादिसद्गुणशीलता ।

स्कान्दे तत्रैव
परदुःखेनात्मदुःखं मन्यन्ते ये नृपोत्तम ।
भगवद्धर्मनिरतास्ते नरा वैष्णवा नृप ॥ १५ ॥

तृतीयस्कन्धे श्रीकपिलदेवहूतिसंवादे (3.25.21)
तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम् ।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः ॥ १६ ॥

पञ्चमस्कन्धे ऋषभदेवस्य पुत्रानुशासने (5.5.2)
महत्सेवां द्वारमाहुर्विमुक्तेस्
तमोद्वारं योषितां सङ्गिसङ्गम् ।
महान्तस्ते समचित्ताः प्रशान्ता
विमन्यवः सुहृदः साधवो ये ॥ १७ ॥

एकादशस्कन्धे भगवत्प्रदत्तोद्धवप्रश्नोत्तरे (11.11.29-31)
कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनाम् ।
सत्यसारो ऽनवद्यात्मा समः सर्वोपकारकः ॥ १८ ॥
कामैरहतधीर्दान्तो मृदुः शुचिरकिञ्चनः ।
अनीहो मितभुक्षान्तः स्थिरो मच्छरणो मुनिः ॥ १९ ॥
अप्रमत्तो गभीरात्मा धृतिमाञ्जितषड्गुणः ।
अमानी मानदः कल्यो मैत्रः कारुणिकः कविः ॥ २० ॥

विष्णुपुराणे यमतद्भटसंवादे (ViP 3.7.20)
न चलति निजवर्णधर्मतो यः

सममतिरात्मसुहृद्विपक्षपक्षे।
न हरति न हन्ति किञ्चिदुच्चैः
स्थितमनसं तमवेहि विष्णुभक्तम्॥ २१॥

ज्ञानिषु भक्तिहेतुर्ज्ञानवत्ता। एकादशे हवियोगेश्वरोत्तरे (BhP 11.2.45,52)
सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥ २२॥
न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा।
सर्वभूतसमः शान्तः स वै भागवतोत्तमः॥ २३॥

एकादशे श्रीभगवदुक्तौ (BhP 11.11.33)
ज्ञात्वाज्ञात्वाथ ये वै मां यावान्यश्चास्मि यादृशः।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः॥ २४॥

तत्रैव हवियोगेश्वरोत्तरे (BhP 11.2.46-47)
ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥ २५॥
अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥ २६॥

भोगवत्सु भक्तिहेतुर्भोगानासक्तता। हवियोगेश्वरोत्तरे (BhP 11.2.48)
गृहीत्वापीन्द्रियैरर्थान्यो न द्वेष्टि न हृष्यति।
विष्णोर्मायामिदं पश्यन्स वै भागवतोत्तमः॥ २७॥

सज्जन्मविद्यादिमत्सु भक्तिहेतुर्निरभिमानिता। तत्रैव (BhP 11.2.51)
न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः।
सज्जते ऽस्मिन्नहम्भावो देहे वै स हरेः प्रियः॥ २८॥

भावाः कथञ्चिद्भक्तैव ज्ञानानासक्त्यमानिता।
भक्तिनिष्ठापका जातास्ततो ह्युत्तमतोदिता॥ २९॥

शैवेषु श्रीशिवकृष्णभेदकाः। बृहन्नारदीये (NārP 1.5.72)
शिवे च परमेशाने विष्णौ च परमात्मनि।
समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः॥ ३०॥

अन्यच्च तेषां भगवच्छास्त्रार्थपरतादिकम्।

साक्षाद्भक्त्यात्मकं मुख्यं लक्षणं लिख्यतेऽधुना ॥ ३१ ॥

स्कान्दे
येषां भागवतं शास्त्रं सदा तिष्ठति सन्निधौ ।
पूजयन्ति च ये नित्यं ते स्युर्भागवता नराः ॥ ३२ ॥
येषां भागवतं शास्त्रं जीवितादधिकं भवेत् ।
महाभागवताः श्रेष्ठा विष्णुना कथिता नराः ॥ ३३ ॥

वैष्णवसम्माननिष्ठा । लैङ्गे
विष्णुभक्तमथायातं यो दृष्ट्वा सुमुखः प्रियः ।
प्रणामादि करोत्येव वासुदेवे यथा तथा ।
स वै भक्त इति ज्ञेयः स पुनाति जगत्त्रयम् ॥ ३४ ॥
रुक्षाक्षरा गिरः शृण्वन्तथा भागवतेरिताः ।
प्रणामपूर्वकं क्षान्त्वा यो वदेद्वैष्णवो हि सः ॥ ३५ ॥
भोजनाच्छादनं सर्वं यथाशक्त्या करोति यः ।
विष्णुभक्तस्य सततं स वै भागवतः स्मृतः ॥ ३६ ॥

गारुडे
येन सर्वात्मना विष्णुभक्त्या भावो निवेशितः ।
वैष्णवेषु कृतात्मत्वान्महाभागवतो हि सः ॥ ३७ ॥

श्रीतुलसीसेवानिष्ठा (NārP 1.5.65-66)
तुलसीकाननं दृष्ट्वा ये नमस्कुर्वते नराः ।
तत्काष्ठाङ्कितकर्णा ये ते वै भागवतोत्तमाः ॥ ३८ ॥
तुलसीगन्धमाघ्राय सन्तोषं कुर्वते तु ये ।
तन्मूलमृद्धृता यैश्च ते वै भागवतोत्तमाः ॥ ३९ ॥

श्रीभगवतः कथापरता

बृहन्नारदीये (1.5.52) श्रीभगवन्मार्कण्डेयसंवादे
मत्कथाश्रवणे येषां वर्तते सात्त्विकी मतिः ।
तद्भक्तविष्णुभक्ताश्च ते वै भागवतोत्तमाः ॥ ४० ॥

स्कान्दे श्रीभगवदर्जुनसंवादे
मत्कथां कुरुते यस्तु मत्कथां च शृणोति यः ।
हृष्यते मत्कथायां च स वै भागवतोत्तमः ॥ ४१ ॥

तृतीयस्कन्धे (BhP 3.25.23) तत्रैव
मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च ।
तपन्ति विविधास्तापा नैतान्मद्गतचेतसः ॥ ४२ ॥

बृहन्नारदीये (1.5.64) तत्रैव
मन्मानसाश्च मद्भक्ता मद्भक्तजनलोलुपाः ।
मन्नामश्रवणासक्तास्ते वै भागवतोत्तमाः ॥ ४३ ॥
येऽभिनन्दन्ति नामानि हरेः श्रुत्वाऽतिहर्षिताः ।
रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः ॥ ४४ ॥

तत्रैवान्यत्र (1.5.61)
अन्येषामुदयं दृष्ट्वा येऽभिनन्दन्ति मानवाः ।
हरिनामपरा ये च ते वै भागवतोत्तमाः ॥ ४५ ॥

स्मरणपरता तत्र स्वधर्मनिष्ठया रागद्वेषनिवृत्त्या स्मरणम्

श्रीविष्णुपुराणे यमतद्भटसंवादे (ViP 3.7.20-26)
न चलति य उच्चैः श्रीभगवत्पदारविन्दे ।
सितमनास्तमवेहि विष्णुभक्तम् ॥ ४६ ॥
कलिकलुषमलेन यस्य नात्मा
विमलमतेर्मलिनीकृतस्तमेनम् ।
मनसि कृतजनार्दनं मनुष्यं
सततमवेहि हरेरतीवभक्तम् ॥ ४७ ॥
कनकमपि रहस्यवेक्ष्य बुद्ध्या
तृणमिव यः समवैति परस्वम् ।
भवति च भगवत्यनन्यचेताः
पुरुषवरं तमवेहि विष्णुभक्तम् ॥ ४८ ॥
स्फटिकगिरिशिलामलः क्व विष्णुर्
मनसि नृणां क्व च मत्सरादिदोषः ।
न हि तुहिनमयूखरश्मिपुञ्जे
भवति हुताशनदीप्तिजः प्रतापः ॥ ४९ ॥
विमलमतिरमत्सरः प्रशान्तः
शुचिचरितोऽखिलसत्त्वमित्रभूतः ।
प्रियहितवचनोऽस्तुमानमायो
वसति सदा हृदि तस्य वासुदेवः ॥ ५० ॥

वसति हृदि सनातने च तस्मिन्
भवति पुमान्जगतोऽस्य सौख्यरूपः।
क्षितिरसमतिरम्यमात्मनोऽन्तः
कथयति चारुतयैव शालपोतः॥ ५१॥

अन्यविजये वैराग्यादिना च स्मरणम्

एकादशस्कन्धे हवियोगेश्वरोत्तरे (BhP 11.2.49, 53-54)
देहेन्द्रियप्राणमनोधियां यो
जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः।
संसारधर्मैरविमुह्यमानः
स्मृत्या हरेर्भागवतप्रधानः॥ ५२॥
त्रिभुवनविभवहेतवे ऽप्यकुण्ठ
स्मृतिरजितात्मसुरादिभिर्विमृग्यात्।
न चलति भगवत्पदारविन्दाल्
लवनिमिषार्धमपि यः स वैष्णवाग्र्यः॥ ५३॥
भगवत उरुविक्रमाङ्घ्रिशाखा
नखमणिचन्द्रिकया निरस्ततापे।
हृदि कथमुपसीदतां पुनः स
प्रभवति चन्द्र इवोदिते ऽर्कतापः॥ ५४॥

स्कान्दे तत्रैव
येऽर्चयन्ति सदा विष्णुं यज्ञेशं वरदं हरिम्।
देहिनः पुण्यकर्माणः सदा भागवता हि ते॥ ५५॥

लैङ्गे
विष्णुक्षेत्रे शुभान्येव करोति स्नेहसंयुतः।
प्रतिमां च हरेर्नित्यं पूजयेत्प्रतयामवान्॥ ५६॥
विष्णुभक्तः स विज्ञेयः कर्मणा मनसा गिरा।
नारायणपरो नित्यं भूप भागवतो हि सः॥ ५७॥

अथ वैष्णवधर्मनिष्ठादि

पाद्मोत्तरखण्डे (6.253.27)
तापादिपञ्चसंस्कारी नवेज्याकर्मकारकः।
अर्थपञ्चकविद्विप्रो महाभागवतः स्मृतः॥ ५८॥

एकान्तिकता
गारुडे
एकान्तेन सदा विष्णौ यस्माद्देवे परायणाः ।
तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः ॥ ५९ ॥

तद्विज्ञानेनानन्यपरता

एकादशे (BhP 11.11.33) उद्धवप्रश्नोत्तरे
ज्ञात्वाज्ञात्वाथ ये वै माम्यावान्यश्चास्मि यादृशः ।
भजन्त्यनन्यभावेन ते वै भागवता मताः ॥ ६० ॥

एकादशस्कन्धे (BhP 11.2.50)
न कामकर्मबीजानां यस्य चेतसि सम्भवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥ ६१ ॥

सा च एकान्तिता चतुर्धा

तत्र धर्मानादरेण श्रीमदुद्धवप्रश्नोत्तर एव (BhP 11.11.32)
आज्ञायैवं गुणान्दोषान्मयादिष्टानपि स्वकान् ।
धर्मान्सन्त्यज्य यः सर्वान्मां भजेत स तु सत्तमः ॥ ६२ ॥

श्रीभगवद्गीतायाम् (Gītā 18.66)
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६३ ॥

चतुर्थस्कन्धे (BhP 4.29.47)
यदा यस्यानुगृह्णाति भगवानत्मभावितः ।
न जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥ ६४ ॥

अन्यसर्वनिरपेक्षता

श्रीभगवदुद्धवसंवादे (BhP 11.26.27) ऐलोपाख्याने
सन्तो ऽनपेक्षा मच्चित्ताः प्रशान्ताः समदर्शिनः ।
निर्ममा निरहङ्कारा निर्द्वन्द्वा निष्परिग्रहाः ॥ ६५ ॥

अतव श्रीकपिलदेवहूतिसंवादे (3.25.24)
त एते साधवः साध्वि सर्वसङ्गविवर्जिताः ।
सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते ॥ ६६ ॥

विघ्नाकुलत्वेऽपि मनोरतिपरता ।

स्कान्दे तत्रैव
यस्य कृच्छ्रगतस्यापि केशवे रमते मनः ।
न विच्युता च भक्तिर्वै स वै भागवतो नरः ॥ ६७ ॥
आपद्गतस्य यस्येह भकिरव्यभिचारिणी ।
नान्यत्र रमते चित्तं स वै भागवतो नरः ॥ ६८ ॥

प्रेमैकरसता ।

श्रीऋषभदेवस्य पुत्रानुशासने (BhP 5.5.3)
ये वा मयीशे कृतसौहृदार्था जनेषु देहम्भरवार्तिकेषु ।
गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके ॥ ६९ ॥

त्रिधा प्रेमैकपरता प्रेम्णः स्यात्तारतम्यतः ।
उत्तमा मध्यमा चासौ कनिष्ठा चेति भेदतः ॥ ७० ॥

तत्रोत्तमा ।

यथा एकादशे हवियोगेश्वरोत्तरे (BhP 11.2.45-46)
सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥ ७१ ॥

स्वेष्टदेवस्य भावं यः सर्वभूतेषु पश्यति ।
भावयन्ति च तान्यस्मिन्नित्यर्थः सम्मतः सताम् ॥ ७२ ॥

श्रीकपिलदेवहूतिसंवादे (3.25.22)
मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम् ।
मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः ॥ ७३ ॥

श्रीहवियोगेश्वरोत्तरे (BhP 11.2.55)
विसृजति हृदयं न यस्य साक्षाद्

धरिरवशाभिहितो ऽप्यघौघनाशः।
प्रणयरसनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः॥ ७४॥

तत्र मध्यमा।

श्रीहवियोगेश्वरोत्तरे (BhP 11.2.46)
ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥ ७५॥

तत्र कनिष्ठा।

तत्रैव (BhP 11.2.47)
अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥ ७६॥

श्रद्धया पूजनं प्रेमबोधकं भक्त इत्यपि।
लक्षणानि च यान्यग्रे भक्तेर्लेख्यानि तान्यपि॥ ७७॥
वन्दनादीनि विद्यन्ते येषु भागवता हि ते।
एतानि लक्षणानीत्थं गौणमुख्यादिभेदतः॥ ७८॥
ऊह्यानि लक्षणान्येवं विवेच्यानि पराण्यपि॥ ७९॥
ईदृग्लक्षणवन्तः स्युर्दुर्लभा बहवो जनाः।
दिव्या हि मणयो व्यक्तं न वर्तेरन्नितस्ततः॥ ८०॥

अतवोक्तं मोक्षधर्मे नारायणीये (Mbh 12.336.68)
जायमानं हि पुरुषं यं पश्येन्मधुसूदनः।
सात्त्विकस्तु स विज्ञेयो भवेन्मोक्षे च निश्चितः॥ ८१॥

एवं सङ्क्षिप्य लिखिताद्वैष्णवानां तु लक्षणात्।
माहात्म्यमपि विज्ञेयं लिख्यतेऽन्यच्च तत्कियत्॥ ८२॥

अथ भगवद्भक्तानां माहात्म्यम्।

सौपर्णे श्रीशक्रोक्तौ
कलौ भागवतं नाम यस्य पुंसः प्रजायते।
जननी पुत्रिणी तेन पितृणां तु धुरन्धरः॥ ८३॥

कलौ भागवतं नाम दुर्लभं नैव लभ्यते।
ब्रह्मरुद्रपदोत्कृष्टं गुरुणा कथितं मम॥ ८४॥
यस्य भागवतं चिह्नं दृश्यते तु हरिर्मुने।
गीयते च कलौ देवा ज्ञेयास्ते नास्ति संशयः॥ ८५॥

श्रीमार्कण्डेयोक्तौ
समीपे तिष्ठते यस्य ह अन्तकालेऽपि वैष्णवः।
गच्छते परमं स्थानं यद्यपि ब्रह्महा भवेत्॥ ८६॥

नारदीये श्रीवामदेवरुक्माङ्गदसंवादे (NārP 2.10.37)
श्वपचोऽपि महीपाल विष्णुभक्तो द्विजाधिकः।
विष्णुभक्तिविहीनस्तु द्विजोऽपि श्वपचाधिकः॥ ८७॥

स्कान्दे रेवाखण्डे श्रीब्रह्मोक्तौ
इन्द्रो महेश्वरो ब्रह्मा परं ब्रह्म तदैव हि।
श्वपचोऽपि भवत्येव यदा तुष्टाऽसि केशव॥ ८८॥
श्वपचादपि कष्टत्वं ब्रह्मेशानादयः सुराः।
तदैवाच्युत यान्त्येते यदैव त्वं पराङ्मुखः॥ ८९॥
स कर्ता सर्वधर्माणां भक्तो यस्तव केशव।
स कर्ता सर्वपापानां यो न भक्तस्तवाच्युत॥ ९०॥
धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युत।
पापं भवति धर्मोऽपि तवाभक्तैः कृतो हरेः॥ ९१॥
निःशेषधर्मकर्ता वाप्यभक्तो नरके हरे।
सदा तिष्ठति भक्तस्ते ब्रह्महापि विशुध्यति॥ ९२॥
निश्चला त्वयि भक्तिर्या सैव मुक्तिर्जनार्दन।
मुक्ता एव हि भक्तास्ते तव विष्णो यतो हरे॥ ९३॥

तत्रैव दुर्वासोनारदसंवादे
नूनं भागवता लोके लोकरक्षाविशारदाः।
व्रजन्ति विष्णुनादिष्टा हृदिस्थेन महामुने॥ ९४॥
भगवानेव सर्वत्र भूतानां कृपया हरिः।
रक्षणाय चरन्लोकान्भक्तरूपेण नारद॥ ९५॥

तत्रैव श्रीब्रह्मनारदसंवादे
यस्तु विष्णुपरो नित्यं दृढभक्तिर्जितेन्द्रियः।
स्वगृहेऽपि वसन्याति तद्विष्णोः परमं पदम्॥ ९६॥

अश्वमेधसहस्राणां सहस्रं यः करोति वै ।
नासौ तत्फलमाप्नोति तद्भक्तैर्यदवाप्यते ॥ ९७ ॥

तत्रैवामृतसारोद्धारे श्रीयमतद्भटसंवादे
सर्वत्र वैष्णवाः पूज्याः स्वर्गे मर्त्ये रसातले ।
देवतानां मनुष्याणां तथैवोरगरक्षसाम् ॥ ९८ ॥
येषां स्मरणमात्रेण पापलक्षशतानि च ।
दह्यन्ते नात्र सन्देहो वैष्णवानां महात्मनाम् ॥ ९९ ॥
येषां पादरजेनैव प्राप्यते जाह्नवीजलम् ।
नार्मदं यामुनं चैव किं पुनः पादयोर्जलम् ॥ १०० ॥
येषां वाक्यजलौघेन विना गङ्गाजलैरपि ।
विना तीर्थसहस्रेण स्नातो भवति मानवः ॥ १०१ ॥

तत्रैव चातुर्मास्यमाहात्म्ये
तावद्भ्रमन्ति संसारे पितरः पिण्डतत्परः ।
यावत्कुले भक्तियुक्तः सुतो नैव प्रजायते ॥ १०२ ॥
स एव ज्ञानवान्लोके योगिनां प्रथमो हि सः ।
महाक्रतूनामाहर्ता हरिभक्तियुतो हि यः ॥ १०३ ॥

काशीखण्डे ध्रुवचरिते
न च्यवन्ते हि यद्भक्त्या महत्यां प्रलयापदि ।
अतोऽच्युतोऽखिले लोके स एकः सर्वगोऽव्ययः ॥ १०४ ॥
न तस्माद्भगवद्भक्ताद्भेतव्यं केनचित्क्वचित् ।
नियतं विष्णुभक्ता येन ते स्युः परतापिनः ॥ १०५ ॥

तत्रैवाग्रे
ब्राह्मणः क्षत्रियः वैश्यः शूद्रो वा यदि वेतरः ।
विष्णुभक्तिसमायुक्तो ज्ञेयः सर्वोत्तमोत्तमः ॥ १०६ ॥
शङ्खचक्राङ्कितततनुः शिरसा मञ्जरीधरः ।
गोपीचन्दनलिप्ताङ्गो दृष्टश्चेद्तदघं कुतः ॥ १०७ ॥

महाभारते राजधर्मे
ईश्वरं सर्वभूतानां जगतः प्रभवाप्ययम् ।
भक्ता नारायणं देवं दुर्गाण्यतितरन्ति ते ॥ १०८ ॥

विष्णुधर्मोत्तरे

शयनादुत्थितो यस्तु कीर्तयेन्मधुसूदनम्।
कीर्तनात्तस्य पापानि नाशमायान्त्यशेषतः॥ १०९॥

तत्रैव
यस्याप्यनन्ते जगतामधीशे
भक्तिः परा यादवदेवदेवे।
तस्मात्परं नापरमस्ति किञ्चित्
पात्रं त्रिलोके पुरुषप्रवीर॥ ११०॥

द्वारकामाहात्म्ये श्रीप्रह्लादबलिसंवादे
नित्यं ये प्रातरुत्थाय वैष्णवानां तु कीर्तनम्।
कुर्वन्ति ते भागवताः कृष्णतुल्याः कलौ बले॥ १११॥

हरिभक्तिसुधोदये
स्वदर्शनस्पर्शनपूजनैः कृती
तमांसि विष्णुप्रतिमेव वैष्णवः।
धुन्वन्वसत्यत्र जनस्य यन्न तत्
स्वार्थं परं लोकहिताय दीपवत्॥ ११२॥

इतिहाससमुच्चये श्रीलोमशवाक्ये
ये भजन्ति जगद्योनिं वासुदेवं सनातनम्।
न तेभ्यो विद्यते तीर्थमधिकं राजसत्तम॥ ११३॥
यत्र भागवताः स्नानं कुर्वन्ति विमलाश्रयाः।
तत्तीर्थमधिकं विद्धि सर्वपापविशोधनम्॥ ११४॥
यत्र रागादिरहिता वासुदेवपरायणाः।
तत्र सन्निहितो विष्णुर्नृपते नात्र संशयः॥ ११५॥
न गन्धैर्न तथा तोयैर्न पुष्पैश्च मनोहरैः।
सान्निध्यं कुरुते देवो यत्र सन्ति न वैष्णवाः॥ ११६॥
बलिभिश्चोपवासैश्च नृत्यगीतादिभिस्तथा।
नित्यमाराध्यमानोऽपि तत्र विष्णुर्न तृप्यति॥ ११७॥
तस्मादेते महाभागा वैष्णवा वीतकल्मषाः।
पुनन्ति सकलान्लोकांस्तत्तीर्थमधिकं ततः॥ ११८॥
शूद्रं वा भगवद्भक्तं निषादं श्वपचं तथा।
वीक्षतं जातिसामान्यात्स याति नरकं ध्रुवम्॥ ११९॥
तस्माद्विष्णुप्रसादाय वैष्णवान्परितोषयेत्।
प्रसादसुमुखो विष्णुस्तेनैव स्यान्न संशयः॥ १२०॥

तत्रैव श्रीनारदपुण्डरीकसंवादे

ये नृशंसा दुरात्मानः पापाचाररताः सदा ।
तेऽपि यान्ति परं धाम नारायणपराश्रयाः ॥ १२१ ॥
लिप्यन्ते न च पापेन वैष्णवा विष्णुतत्पराः ।
पुनन्ति सकलान्लोकान्सहस्रांशुरिवोदितः ॥ १२२ ॥
जन्मान्तरसहस्रेषु यस्य स्याद्बुद्धिरीदृशी ।
दासोऽहं वासुदेवस्य सर्वान्लोकान्समुद्धरेत् ॥ १२३ ॥
स याति विष्णुसालोक्यं पुरुषो नात्र संशयः ।
किं पुनस्तद्गतप्राणाः पुरुषाः संयतेन्द्रियाः ॥ १२४ ॥
स्मृतः सम्भाषितो वापि पूजितो वा द्विजोत्तमाः ।
पुनाति भगवद्भक्तश्चाण्डालोऽपि यदृच्छया ॥ १२५ ॥

श्रीव्यासवाक्ये

जन्मान्तरसहस्रेषु विष्णुभक्तो न लिप्यते ।
यस्य सन्दर्शनादेव भस्मीभवति पातकम् ॥ १२६ ॥

इतिहाससमुच्चये श्रीभगवद्वाक्ये

न मे प्रियश्चतुर्वेदी मद्भक्तः श्वपचः प्रियः ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम् ॥ १२७ ॥

तत्रैव ब्रह्मवाक्ये

सभर्तृका वा विधवा विष्णुभक्तिं करोति या ।
समुद्धरति चात्मानं कुलमेकोत्तरं शतम् ॥ १२८ ॥

द्वारकामाहात्म्ये प्रह्लादबलिसंवादे

सङ्कीर्णयोनयः पूता ये भक्ता मधुसूदने ।
म्लेच्छतुल्याः कुलीनास्ते ये न भक्ता जनार्दने ॥ १२९ ॥

आदिपुराणे श्रीकृष्णार्जुनसंवादे

वैष्णवान्भज कौन्तेय मा भजस्वान्यदेवताः ।
पुनन्ति वैष्णवाः सर्वे सदेवमिदं जगत् ।
मद्भक्तो दुर्लभो यस्य स एव मम दुर्लभः ॥ १३० ॥
तत्परो दुर्लभो नास्ति सत्यं सत्यं धनञ्जय ।
जगतां गुरवो भक्ता भक्तानां गुरवो वयम् ॥
सर्वत्र गुरवो भक्ता वयं च गुरवो यथा ।

अस्माकं बान्धवा भक्ता भक्तानां बान्धवा वयम् ॥ १३१ ॥
अस्माकं गुरवो भक्ता भक्तानां गुरवो वयम् ।
मद्भक्ता यत्र गच्छन्ति तत्र गच्छामि पार्थिव ।
भक्तानामनुगच्छन्ति मुक्तयः श्रुतिभिः सह ॥ १३२ ॥
ये मे भक्तजनाः पार्थ न मे भक्ताश्च ते जनाः ।
मद्भक्तानां च ये भक्तास्ते मे भक्ततमा मताः ॥ १३३ ॥
ये केचित्प्राणिनो भक्ता मदर्थे त्यक्तबान्धवाः ।
तेषामहं परिक्रीतो नान्यक्रीतो धनञ्जय ॥ १३४ ॥
एषां भक्ष्यं सुनिर्णीतं श्रूयतां निश्चितं मम ।
उच्छिष्टमवशिष्टं च भक्तानां भोजनद्वयम् ॥ १३५ ॥
नामयुक्तजनाः केचिज्जात्यन्तरसमन्विताः ।
कुर्वन्ति मे यथा प्रीतिं न तथा वेदपारगाः ॥ १३६ ॥

बृहन्नारदीये मार्कण्डेयं प्रति श्रीभगवदुक्तौ (1.4.96,98)
विष्णुर्भक्तकुटुम्बीति वदन्ति विबुधाः सदा ।
तदेव पालयिष्यामि मज्जनो नानृतं वदेत् ॥ १३७ ॥
मम जन्म कुले यस्य तत्कुलं मोक्षगामि वै ।
मयि तुष्टे मुनिश्रेष्ठ किमसाध्यं जगत्त्रये ॥ १३८ ॥

मयि भक्तिपरो यस्तु मद्याजी मत्कथापरः ।
मद्ध्यानी स्वकुलं सर्वं नयत्यच्युतरूपताम् ॥ १३९ ॥
मदर्थं कर्म कुर्वाणो मत्प्रणामपरो नरः ।
मन्मनाः स्वकुलं सर्वं नयत्यच्युतरूपताम् ॥ १४० ॥
अहमेव द्विजश्रेष्ठ नित्यं प्रच्छन्नविग्रहः ।
भगवद्भक्तरूपेण लोकान्रक्षामि सर्वदा ॥ १४१ ॥

तत्रैवादितिमाहात्म्ये श्रीसूतोक्तौ
विप्राः शृणुध्वं माहात्म्यं हरिभक्तिरतात्मनाम् ।
हरिध्यानपराणां तु कः समर्थः प्रबाधितुम् ॥ १४२ ॥
हरिभक्तिपरो यत्र तत्र ब्रह्मा हरिः शिवः ।
तत्र देवाश्च सिद्धाद्या नित्यं तिष्ठन्ति सत्तमाः ॥ १४३ ॥
निमिषं निम्षार्धं वा यत्र तिष्ठन्ति सत्तमाः ।
तत्रैव सर्वश्रेयांसि तत्तीर्थं तत्तपोवनम् ॥ १४४ ॥

तत्रैवादितिं प्रति श्रीभगवदुत्तरे (NārP 1.11.57-58)
रागद्वेषविहीना ये मद्भक्ता मत्परायणाः ।

वदन्ति सततं ते मां गतासूया अदाम्भिकाः ॥ १४५ ॥
परोपतापविमुखाः शिवभक्तिपरायणाः ।
मत्कथाश्रवणासक्ता वहन्ति सततं हि माम् ॥ १४६ ॥

तत्रैव ध्वजारोपणमाहात्म्ये श्रीविष्णुदूतोक्तौ (NārP 1.20.73)
यतीनां विष्णुभक्तानां परिचर्यापरायणाः ।
ईक्षिता अपि गच्छन्ति पापिनोऽपि परां गतिम् ॥ १४७ ॥

तत्रैव श्रीभगवत्तोषप्रकारप्रश्नोत्तरे (NārP 1.34.56)
रिपवस्तं न हिंसन्ति न बाधन्ते ग्रहाश्च तम् ।
राक्षसाश्च न चेक्षन्ते नरं विष्णुपरायणम् ॥ १४८ ॥
भक्तिर्दृढा भवेद्यस्य देवदेवे जनार्दने ।
श्रेयांसि तस्य सिध्यन्ति भक्तिमन्तोऽधिकास्ततः ॥ १४९ ॥

तत्रैवाग्रे (NārP 1.34.63)
अद्यापि च मुनिश्रेष्ठ ब्रह्माद्या अपि देवताः ।
प्रभावं न विजानन्ति विष्णुभक्तिरतात्मनाम् ॥ १५० ॥

किं च (NārP 1.30.101)
धर्मार्थकाममोक्षाख्याः पुरुषार्था द्विजोत्तमाः ।
हरिभक्तिपराणां वै सम्पद्यन्ते न संशयः ॥ १५१ ॥

तत्रैव लुब्धकोपाख्यानस्यादौ (NārP 1.37.9,12)
ये विष्णुनिरताः शान्ता लोकानुग्रहतत्पराः ।
सर्वभूतदयायुक्ता विष्णुरूपाः परिकीर्तिताः ॥ १५२ ॥
विष्णुभक्तिविहीना ये चण्डालाः परिकीर्तिताः ।
चण्डाला अपि वै श्रेष्ठा हरिभक्तिपरायणाः ॥ १५३ ॥

तत्रैव यज्ञध्वजोपाख्यानस्यादौ श्रीसूतवाक्यम् (NārP 1.39.34,8)
हरिभक्तिरसास्वादमुदिता ये नरोत्तमाः ।
नमस्करोम्यहं तेभ्यो यत्सङ्गान्मुक्तिभाङ्नरः ॥ १५४ ॥
हरिभक्तिपरा ये तु हरिनामपरायणाः ।
दुर्वृत्ता वा सुवृत्ता वा तेभ्यो नित्यं नमो नमः ॥ १५५ ॥
अहो भाग्यमहो भाग्यं विष्णुभक्तिरतात्मनाम् ।
यस्मान्मुक्तिः करस्थैव योगिनामपि दुर्लभा ॥ १५६ ॥

तत्रैव कलिप्रसङ्गे (NārP 1.41?)
घोरे कलियुगे प्राप्ते सर्वधर्मविवर्जिते ।
वासुदेवपरा मर्त्याः कृतार्था नात्र संशयः ॥ १५७ ॥
अस्त्यन्तर्दुर्लभा प्रोक्ता हरिभक्तिः कलौ युगे ।
हरिभक्तिरतानां वै पापबन्धो न जायते ॥ १५८ ॥
वेदवादरताः सर्वे तथा तीर्थनिषेविणः ।
हरिभक्तिरतैः सार्धं कलां नार्हन्ति षोडशीम् ॥ १५९ ॥

अतवोक्तं देवैस्तत्रैव भारतवर्षप्रसङ्गे (NārP 1.3.53)
हरिकीर्तनशीलो वा तद्भक्तानां प्रियोऽपि वा ।
शुश्रूषुर्वापि महतां स वन्द्योऽस्माभिरुत्तमः ॥ १६० ॥

पाद्मे श्रीभगवद्ब्रह्मसंवादे
दर्शनध्यानसंस्पर्शैर्मत्स्यकूर्मविहङ्गमाः ।
पुष्णन्ति स्वान्यपत्यानि तथाहमपि पद्मज ॥ १६१ ॥
मुहूर्तेनापि संहर्तुं शक्तौ यद्यपि दानवात् ।
मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः ॥ १६२ ॥

तत्रैव माघमाहात्म्ये देवदूतविकुण्डलसंवादे
न वयं यमं यमलोकं न न दूतान्घोरदर्शनात् ।
पश्यन्ति वैष्णवा नूनं सत्यं सत्यं मयोदितम् ॥ १६३ ॥
श्वपाकमिव नेक्षेत लोके विप्रमवैष्णवम् ।
वैष्णवो वर्णबाह्योऽपि पुनाति भुवनत्रयम् ॥ १६४ ॥
न शूद्रा भगवद्भक्तास्ते तु भावना मताः ।
सर्ववर्णेषु ते शूद्रा ये न भक्ता जनार्दन ॥ १६५ ॥
विष्णुभक्तस्य ये दासा वैष्णवान्नभुजश्च ये ।
तेऽपि क्रतुभुजां ग्वैश्य गतिं यान्ति निराकुलाः ॥ १६६ ॥

तत्रैव वैशाखमाहात्म्ये पञ्चपुरुषाणामुक्तौ
भव्यानि भूतानि जनार्दनस्य
परोपकाराय चरन्ति विश्वम् ॥ १६७ ॥

तथा
सन्तः प्रतिष्ठा दीनानां दैवादुद्भूतपाप्मनाम् ।
आर्तानामार्तिहन्तारो दर्शनादेव साधवः ॥ १६८ ॥

तत्रैवोत्तरखण्डे शिवपार्वतीसंवादे (PadmaP 6.229.58-59)
न कर्मबन्धनं जन्म वैष्णवानां च विद्यते ।
विष्णोरनुचरत्वं हि मोक्षयाहुर्मनीषिणः ॥ १६९ ॥
न दास्यममरेशस्य बन्धनं परिकीर्तितम् ।
सर्वबन्धननिर्मुक्ता हरिदासा निरामयाः ॥ १७० ॥

ब्रह्माण्डपुराणे जन्माष्टमीव्रतमाहात्म्ये श्रीचित्रगुप्तोक्तौ
दर्शनस्पर्शनालापसहवासादिभिः क्षणात् ।
भक्ताः पुनन्ति कृष्णस्य साक्षादपि च पुक्कशम् ॥ १७१ ॥
त्यक्तसर्वकुलाचारो महापातकवानपि ।
विष्णोर्भक्तं समाश्रित्य नरो नार्हति यातनाम् ॥ १७२ ॥

वाशिष्ठे
यस्मिन्देशे मरौ तज्ज्ञो नास्ति सज्जनपादपः ।
सफलः शीतलच्छायो न तत्र दिवसं वसेत् ॥ १७३ ॥

सदा सन्तोऽभिगन्तव्या यद्यप्युपदिशन्ति न ।
या हि स्वैरकथास्तेषामुपदेशा भवन्ति ते ॥ १७४ ॥

गारुडे
सत्रयाजिसहस्रेभ्यः सर्ववेदान्तपारगः ।
सर्ववेदान्तवित्कोट्या विष्णुभक्तो विशिष्यते ॥ १७५ ॥
वैष्णवानां सहस्रेभ्य एकान्त्येको विशिष्यते ।
एकान्तिनस्तु पुरुषा गच्छन्ति परमं पदम् ॥ १७६ ॥

श्रीभगवद्गीतासु (Gītā 9.30-33)
अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ १७७ ॥
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ १७८ ॥
मां हि पार्थ व्यपाश्रित्य ये ऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्ते ऽपि यान्ति परां गतिम् ।
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ॥ १७९ ॥

किं च तत्रैव (Gītā 6.47)
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।

श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ १८० ॥

श्रीभागवतस्य प्रथमस्कन्धे श्रीपरीक्षितोक्तौ (BhP 1.19.33)
येषां संस्मरणात्पुंसां सद्यः शुद्ध्यन्ति वै गृहाः ।
किं पुनर्दर्शनस्पर्श पादशौचासनादिभिः ॥ १८१ ॥

तृतीयस्कन्धे श्रीविदुरस्य (BhP 3.13.4)
श्रुतस्य पुंसां सुचिरश्रमस्य
नन्वञ्जसा सूरिभिरीडितो ऽर्थः ।
तत्तद्गुणानुश्रवणं मुकुन्द
पादारविन्दं हृदयेषु येषाम् ॥ १८२ ॥

देवहूतिं प्रति कपिलदेवस्य (BhP 3.25.38)
न कर्हिचिन्मत्पराः शान्तरूपे
नङ्क्ष्यन्ति नो मे ऽनिमिषो लेढि हेतिः ।
येषामहं प्रिय आत्मा सुतश्च
सखा गुरुः सुहृदो दैवमिष्टम् ॥ १८३ ॥

चतुर्थे श्रीध्रुवस्य (BhP 4.9.10)
या निर्वृतिस्तनुभृतां तव पादपद्म
ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्
किं त्वन्तकासिलुलितात्पततां विमानात् ॥ १८४ ॥

श्रीरुद्रस्य (BhP 4.24.29)
स्वधर्मनिष्ठः शतजन्मभिः पुमान्
विरिञ्चतामेति ततः परं हि माम् ।
अव्याकृतं भागवतो ऽथ वैष्णवं
पदं यथाहं विबुधाः कलात्यये ॥ १८५ ॥

पञ्चमे श्रीजडभरतस्य (BhP 5.12.12)
रहूगणैतत्तपसा न याति
न चेज्यया निर्वपणाद्गृहाद्वा ।
न च्छन्दसा नैव जलाग्निसूर्यैर्
विना महत्पादरजोऽभिषेकम् ॥ १८६ ॥

षष्ठे श्रीपरीक्षितः (BhP 6.14.35)
रजोभिः समसङ्ख्याताः पार्थिवैरिह जन्तवः।
तेषां ये केचनेहन्ते श्रेयो वै मनुजादयः॥ १८७॥
प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तम।
मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति॥ १८८॥
मुक्तानामपि सिद्धानां नारायणपरायणः।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने॥ १८९॥

श्रीशिवस्य (BhP 6.17.28)
नारायणपराः सर्वे न कुतश्चन बिभ्यति।
स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः॥ १९०॥

सप्तमे श्रीप्रह्लादस्य (BhP 7.5.32)
नैषां मतिस्तावदुरुक्रमाङ्घ्रिं
स्पृशत्यनर्थापगमो यदर्थः।
महीयसां पादरजोऽभिषेकं
निष्किञ्चनानां न वृणीत यावत्॥ १९१॥

किं च (BhP 7.9.10)
विप्राद्द्विषड्गुणयुतादरविन्दनाभ
पादारविन्दविमुखात्श्वपचं वरिष्ठम्।
मन्ये तदर्पितमनोवचनेहितार्थ
प्राणं पुनाति स कुलं न तु भूरिमानः॥ १९२॥

अष्टमे श्रीगजेन्द्रस्य (BhP 8.3.20)
एकान्तिनो यस्य न कञ्चनार्थं
वाञ्छन्ति ये वै भगवत्प्रपन्नाः।
अत्यद्भुतं तच्चरितं सुमङ्गलं
गायन्त आनन्दसमुद्रमग्नाः॥ १९३॥

नवमे श्रीभगवतः (BhP 9.4.63-66, 68)
अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज।
साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः॥ १९४॥
नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना।
श्रियं चात्यन्तिकीं ब्रह्मन्येषां गतिरहं परा॥ १९५॥
ये दारागारपुत्राप्त प्राणान्वित्तमिमं परम्।

हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥ १९६ ॥
मयि निर्बद्धहृदयाः साधवः समदर्शनाः ।
वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥ १९७ ॥
साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् ।
मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि ॥ १९८ ॥

तत्रैव श्रीदुर्वाससः (BhP 9.5.15)
दुष्करः को नु साधूनां दुस्त्यजो वा महात्मनाम् ।
यैः सङ्गृहीतो भगवान्सात्वतामृषभो हरिः ॥ १९९ ॥
यन्नामश्रुतिमात्रेण पुमान्भवति निर्मलः ।
तस्य तीर्थपदः किं वा दासानामवशिष्यते ॥ २०० ॥

दशमे देवस्तुतौ (BhP 10.2.33)
तथा न ते माधव तावकाः क्वचिद्
भ्रश्यन्ति मार्गात्त्वयि बद्धसौहृदाः ।
त्वयाभिगुप्ता विचरन्ति निर्भया
विनायकानीकपमूर्धसु प्रभो ॥ २०१ ॥

श्रीबादरायणेः (BhP 10.9.21)
नायं सुखापो भगवान्देहिनां गोपिकासुतः ।
ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥ २०२ ॥

तत्रैव श्रीभगवतः (BhP 10.10.41)
साधूनां समचित्तानां मुकुन्दचरणैषिणाम् ।
उपेक्ष्यैः किं धनस्तम्भैरसद्भिरसदाश्रयैः ॥ २०३ ॥

किं च (BhP 10.84.11)
न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ २०४ ॥

अपि च (BhP 10.84.12-13)
नाग्निर्न सूर्यो न च चन्द्रतारका
न भूर्जलं खं श्वसनो ऽथ वाङ्मनः ।
उपासिता भेदकृतो हरन्त्यघं
विपश्चितो घ्नन्ति मुहूर्तसेवया ॥ २०५ ॥
यस्यात्मबुद्धिः कुणपे त्रिधातुके

स्वधीः कलत्रादिषु भौम इज्यधीः।
यत्तीर्थबुद्धिः सलिले न कर्हिंचिज्
जनेष्वभिज्ञेषु स एव गोखरः॥ २०६॥

श्रुतिस्तुतौ (BhP 10.87.27)
तव परि ये चरन्त्यखिलसत्त्वनिकेततया
त उत पदाक्रमन्त्यविगणय्य शिरो निरृतेः।
परिवयसे पशूनिव गिरा विबुधानपि तांस्
त्वयि कृतसौहृदाः खलु पुनन्ति न ये विमुखाः॥ २०७॥

एकादशे श्रीवसुदेवस्य (BhP 11.2.56)
भूतानां देवचरितं दुःखाय च सुखाय च।
सुखायैव हि साधूनां त्वादृशामच्युतात्मनाम्॥ २०८॥
भजन्ति ये यथा देवान्देवा अपि तथैव तान्।
छायेव कर्मसचिवाः साधवो दीनवत्सलाः॥ २०९॥

तत्रैव श्रीभगवतः (BhP 11.20.36)
न मय्येकान्तभक्तानां गुणदोषोद्भवा गुणाः।
साधूनां समचित्तानां बुद्धेः परमुपेयुषाम्॥ २१०॥
एवमेतान्मया दिष्टाननुतिष्ठन्ति मे पथः।
क्षेमं विन्दन्ति मत्स्थानं यद्ब्रह्म परमं विदुः॥ २११॥
निमज्ज्योन्मज्जतां घोरे भवाब्धौ परमायणम्।
सन्तो ब्रह्मविदः शान्ता नौर्दृढेवाप्सु मज्जताम्॥ २१२॥
अन्नं हि प्राणिनां प्राणा आर्तानां शरणं त्वहम्।
धर्मो वित्तं नृणां प्रेत्य सन्तोऽर्वाग्बिभ्यतोऽरणम्॥ २१३॥
सन्तो दिशन्ति चक्षूंषि बहिरर्कः समुत्थितः।
देवता बान्धवाः सन्तः सन्त आत्माहमेव च॥ २१४॥

किं च (BhP 11.20.34)
न किञ्चित्साधवो धीरा भक्ता ह्येकान्तिनो मम।
वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवम्॥ २१५॥

द्वादशे च श्रीपरीक्षितः (BhP 12.6.3)
नात्यद्भुतमहं मन्ये महतामच्युतात्मनाम्।
अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः॥ २१६॥

श्रीरुद्रस्य च मार्कण्डेयमधिकृत्य (BhP 12.10.25)
श्रवणाद्दर्शनाद्वापि महापातकिनो ऽपि वः।
शुध्येरन्नन्त्यजाश्चापि किमु सम्भाषणादिभिः॥ २१७॥

अतव श्रीधर्मराजस्य स्वदूतानुशासने षष्ठस्कन्धे (BhP 6.3.27)
ते देवसिद्धपरिगीतपवित्रगाथा
ये साधवः समदृशो भगवत्प्रपन्नाः।
तान्नोपसीदत हरेर्गदयाभिगुप्तान्
नैषां वयं न च वयः प्रभवाम दण्डे॥ २१८॥

तथा श्रीविष्णुपुराणे (ViP 3.7.26, 32-34)
यमनियमविधूतकल्मषाणाम्
अनुदिनमच्युतसक्तमानसानाम्।
अपगतमदमानमत्सराणां
व्रज भट दूरतरेण मानवानाम्॥ २१९॥

सकलमिदमहं च वासुदेवः
परमपुमान्परमेश्वरः स एकः।
इति मतिरचला भवत्यनन्ते
हृदयगते व्रज तान्विहाय दूरात्॥ २२०॥
कमलनयन वासुदेव विष्णो
धरणिधराच्युत शङ्खचक्रपाणे।
भव शरणमितीरयन्ति ये वै
त्यज भट दूरतरेण तानपापान्॥ २२१॥
वसति मनसि यस्य सोऽव्ययात्मा।
पुरुषवरस्य न तस्य दृष्टिपाते।
तव गतिरथ वा ममास्ति चक्र
प्रतिहतवीर्यबलस्य सोऽन्यलोक्यः॥ २२२॥

नारसिंहे विष्णुपुराणे च (ViP 3.7.15)
अहममरार्चितेन धात्रा
यम इति लोकहिताहिते नियुक्तः।
हरिगुरुवशगोऽस्मि न स्वतन्त्रः
प्रभवति संयमने ममापि विष्णुः॥ २२३॥

सुगतिमभिलषामि वासुदेवा

वहमपि भागवतस्थितान्तरात्मा ।
मधुवर वशगोऽस्मि न स्वतन्त्रः
प्रभवति संयमने ममापि कृष्णः ॥ २२४ ॥
न हि शशकलुषच्छविः कदाचित्
तिमिरपराभवतामुपैति चन्द्रः ।
भगवति च हरावनन्यचेता
भृशमलिनोऽपि विराजते मनुष्यः ॥ २२५ ॥

पाद्मे देवद्यूतिविकुण्डलसंवादे (PadmaP 3.31.100, 102-3)
प्राहास्मान्यमुना भ्राता सदैव हि पुनः पुनः ।
भवद्भिर्वैष्णवास्त्याज्या न ते स्युर्मम गोचराः ॥ २२६ ॥
दुराचारो दुष्कृतोऽपि सदाचाररतोऽपि यः ।
भवद्भिः स सदा त्याज्यो विष्णुं च भजते नरः ॥ २२७ ॥
वैष्णवो यद्गृहे भुङ्क्ते येषां वैष्णवसङ्गतिः ।
तेऽपि वः परिवार्याः स्युस्तत्सङ्गहतकिल्बिषाः ॥ २२८ ॥

स्कान्दे अमृतसारोद्धारे
एकादश्यामभुञ्जाना युक्ताः पापशतैरपि ।
भवद्भिः परिहर्तव्या हिता मे यदि सर्वदा ॥ २२९ ॥
ये स्मरन्ति जगन्नाथं मृत्युकाले जनार्दनम् ।
पापकोटिशतैर्युक्ता न ते ग्राह्या ममाज्ञया ॥ २३० ॥
न ब्रह्मा न शिवाग्नीन्द्रा नाहं नान्ये दिवौकसः ।
शक्ता न निग्रहं कर्तुं वैष्णवानां महात्मनाम् ॥ २३१ ॥
अतोऽहं सर्वकालं च वैष्णवानां बिभेमि वै ।
भवद्भिः परिहर्तव्या वैष्णवा ये सदैव हि ॥ २३२ ॥
वैष्णवा विष्णुवत्पूज्या मम मान्या विशेषतः ।
तेषां कृतेऽपमानेऽपि विनाशो जायते ध्रुवम् ॥ २३३ ॥

किं च
येषां स्मरणमात्रेण पापलक्षशतानि च ।
दह्यन्ते नात्र सन्देहो वैष्णवानां महात्मनाम् ॥ २३४ ॥
येषां पादरजेनैव प्राप्यते जाह्नवीजलम् ।
नार्मदं यामुनं चैव किं पुनः पादयोर्जलम् ॥ २३५ ॥
येषां वाक्यजलौघेन विना गङ्गाजलैरपि ।
विना तीर्थसहस्रेण स्नातो भवति मानवः ॥ २३६ ॥

किं च
ब्रह्मलोके न मे वासो न मे वासो हरालये।
नालये लोकपालानां वैष्णवानां पराभवे॥ २३७॥
न देवा न च गन्धर्वा न यक्षोरगराक्षसाः।
त्रातुं समर्था ऋषयो वैष्णवानां पराभवे॥ २३८॥
करोमि कर्मणा वाचा मनसापि न विप्रियम्।
वैष्णवानां महाभागाः सुदर्शनभयादपि॥ २३९॥
एकतो धावते चक्रमेकतो हरिवाहनम्।
एकतो विष्णुदूताश्च वैष्णवे चार्दिते मया॥ २४०॥

बृहन्नारदीये चैकादशीमाहात्म्ये (NārP 1.23.75, 77-79)
ये विष्णुपूजनरताः प्रयताः कृतज्ञाश्
चैकादशीव्रतपरा विजितेन्द्रियाश्च।
नारायणाच्युत हरे शरणं भवेति
शान्ता वदन्ति सततं तरसा त्यजध्वम्॥ २४१॥
नारायणार्पितधियो हरिभक्तभक्तान्
स्वाचारमार्गनिरतान्गुरुसेवकांश्च।
सत्पात्रदाननिरतान्हरिकीर्तिभक्तान्
दूतास्त्यजध्वमनिशं हरिनामसक्तान्॥ २४२॥
पाषण्डसङ्गरहितान्हरिभक्तितुष्टान्
सत्सङ्गलोलुपतरांश्च तथातिपुण्यान्।
शम्भोर्हरेश्च समबुद्धिमतस्तथैव
दूतास्त्यजध्वमुपकारपरान्नराणाम्॥ २४३॥
ये वीक्षिता हरिकथामृतसेवकैश्च
नारायणस्मृतिपरायणमानसैश्च।
विप्रेन्द्रपादजलसेवनसम्प्रहृष्टैस्
तान्पापिनोऽपि च भटा सततं त्यजध्वम्॥ २४४॥

अतवोक्तं श्रीनारदेन चतुर्थस्कन्धशेषे (BhP 4.31.22)
श्रियमनुचरतीं तदर्थिनश्च
द्विपदपतीन्विबुधांश्च यत्स्वपूर्णः।
न भजति निजभृत्यवर्गतन्त्रः
कथममुमुद्विसृजेत्पुमान्कृतज्ञः॥ २४५॥

अतव प्रार्थनम्। नारायणव्यूहस्तवे
नाहं ब्रह्मापि भुयासं त्वद्भक्तिरहितो हरे।

त्वयि भक्तस्तु कीटोऽपि भूयासं जन्मजन्मसु ॥ २४६ ॥

श्रीब्रह्मस्तुतौ च दशमस्कन्धे (BhP 10.14.30)
तदस्तु मे नाथ स भूरिभागो
भवेऽत्र वान्यत्र तु वा तिरश्चाम्।
येनाहमेकोऽपि भवज्जनानां
भूत्वा निषेवे तव पादपल्लवम्॥ २४७ ॥

अतवोक्तं श्रीनारायणव्यूहस्तवे
ये त्यक्तलोकधर्मार्था विष्णुभक्तिवशं गताः।
भजन्ति परमात्मानं तेभ्यो नित्यं नमो नमः॥ २४८ ॥

एवं श्रीभगवद्भक्तमाहात्म्यामृतवारिधेः।
विचित्रभङ्गलेखार्हो लोभलोलं विनास्ति कः॥ २४९ ॥
अतः श्रीभगवद्भक्तजनानां सङ्गतिः सदा।
कार्या सर्वप्रयत्नेन द्वौ लोकौ विजिगीषुभिः॥ २५० ॥

अथ श्रीभगवद्भक्तसङ्गमाहात्म्यम्

भगवद्भक्तपादाब्जपादुकाभ्यो नमोऽस्तु मे।
यत्सङ्गमः साधनं च साध्यं चाखिलमुत्तमम्॥ २५१ ॥

तत्र सर्वपातकमोचकता

बृहन्नारदीये (NārP 1.36.60) यज्ञमाल्युपाख्यानान्ते।
हरिभक्तिपराणां तु सङ्गिनां सङ्गमात्रतः।
मुच्यते सर्वपापेभ्यो महापातकवानपि॥ २५२ ॥

सामान्यतोऽनर्थनिवर्तकतार्थप्रापकता च।

पाद्मे वैशाखमाहात्म्ये (PadmaP 5.94.74) श्रीमुनिशर्माणं प्रति प्रेतानामुक्तौ
विनाशयत्यपयशो बुद्धिं विशदयत्यपि।
प्रतिष्ठापयति प्रायो नृणां वैष्णवदर्शनम्॥ २५३ ॥

तत्र (?) श्रीयमब्राह्मणसंवादे महारथनृपोक्तौ
यथा प्रपद्यमानस्य भगवन्तं विभावसुम्।

शीतं भयं तमोऽप्येति साधून्संसेवतः सदा ॥ २५४ ॥

तत्रैव प्रेतोपाख्याने प्रेतोक्तौ (PadmaP 5.98.57)
अपाकरोति दुरितं श्रेयः संयोजयत्यपि ।
यशो विस्तारयत्याशु नृणां वैष्णवसङ्गमः ॥ २५५ ॥

अथ सर्वतीर्थाधिकता

तत्रैव (PadmaP 5.98.78)
गङ्गादिपुण्यतीर्थेषु यो नरः स्नातुमिच्छति ।
यः करोति सतां सङ्गं तयोः सत्सङ्गमो वरः ॥ २५६ ॥

तत्रैव भगीरथनृपोक्तौ (PadmaP 5.100.5)
यः स्नातः शान्तिसितया साधुसङ्गतिगङ्गया ।
किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ॥ २५७ ॥

अथ सर्वेष्टसाधकता

यानि यानि दुरापाणि वाञ्छितानि महीतले ।
प्राप्यन्ते तानि तान्येव साधूनामेव सङ्गमात् ॥ २५८ ॥

अथ अनर्थस्याप्यर्थत्वापादकता

वाशिष्ठे
शून्यमापूर्णतामेति मृतिरप्यमृतायते ।
आपत्सम्पदिव भाति विद्वज्जनसमागमे ॥ २५९ ॥

तृतीयस्कन्धे (BhP 3.23.55)
सङ्गो यः संसृतेर्हेतुरसत्सु विहितो ऽधिया ।
स एव साधुषु कृतो निःसङ्गत्वाय कल्पते ॥ २६० ॥

श्रीकपिलदेवोक्तौ (BhP 3.25.20)
प्रसङ्गमजरं पाशमात्मनः कवयो विदुः ।
स एव साधुषु कृतो मोक्षद्वारमपावृतम् ॥ २६१ ॥

यतः

अरिर्मित्रं विषं पथ्यमधर्मो धर्मतां व्रजेत्।
प्रसन्ने पुण्डरीकाक्षे विपरीते विपर्ययः॥ २६२॥

किं च श्रीभगवद्वाक्यं
मन्निमित्तं कृतं पापमपि धर्माय कल्पते।
मामनादृत्य धर्मोऽपि पापं स्यान्मत्प्रभावतः॥ २६३॥

चतुर्थस्कन्धे श्रीध्रुवोक्तौ (BhP 4.9.12)
ते न स्मरन्त्यतितरां प्रियमीश मर्त्यं
ये चान्वदः सुतसुहृद्गृहवित्तदाराः।
ये त्वब्जनाभ भवदीयपदारविन्द
सौगन्ध्यलुब्धहृदयेषु कृतप्रसङ्गाः॥ २६४॥

पाद्मे तत्रैव प्रेतोक्तौ (PadmaP 5.98.58)
रसायनमयी शीता परमानन्ददायिनी।
नानन्दयति कं नाम वैष्णवाश्रयचन्द्रिका॥ २६५॥

अथ मोक्षदत्वम्। दशमस्कन्धे श्रीमुचुकुन्दस्तुतौ (BhP 10.51.53)
भवापवर्गो भ्रमतो यदा भवेज्
जनस्य तर्ह्यच्युत सत्समागमः।
सत्सङ्गमो यर्हि तदैव सद्गतौ
परावरेशे त्वयि जायते मतिः॥ २६६॥

अतवोक्तं श्रीप्रचेतोभिश्चतुर्थस्कन्धे (BhP 4.30.35-37)
यत्रेड्यन्ते कथा मृष्टास्तृष्णायाः प्रशमो यतः।
निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन॥ २६७॥
यत्र नारायणः साक्षाद्भगवान्न्यासिनां गतिः।
संस्तूयते सत्कथासु मुक्तसङ्गैः पुनः पुनः॥ २६८॥
तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया।
भीतस्य किं न रोचेत तावकानां समागमः॥ २६९॥

अथ सर्वसारता। बृहन्नारदीये श्रीनारदसनत्कुमारसंवादे (NārP 1.4.13)
असारभूते संसारे सारमेतदजात्मज।
भगवद्भक्तसङ्गश्च हरिभक्तिस्तितिक्षुता॥ २७०॥

पाद्मे तत्रैव महारथनृपोक्तौ

असागरोत्थं पीयूषमद्रव्यं व्यसनौषधम्।
हर्षश्चालोकपर्यन्तः सतां किल समागमः॥ २७१॥

अथ भगवत्कथामृतपानैकहेतुता। पाद्मे वैशाखमाहात्म्ये श्रीनारदोक्तौ (PadmaP 5.84.37)
प्रसङ्गेन सतामात्ममनः श्रुतिरसायनाः।
भवन्ति कीर्तनीयस्य कथाः कृष्णस्य निर्मलाः॥ २७२॥

तृतीयस्कन्धे (BhP 3.25.25) श्रीकपिलदेवोक्तौ
सतां प्रसङ्गान्मम वीर्यसंविदो
भवन्ति हृत्कर्णरसायनाः कथाः।
तज्जोषणादाश्वपवर्गवर्त्मनि
श्रद्धा रतिर्भक्तिरनुक्रमिष्यति॥ २७३॥

चतुर्थे श्रीनारदोक्तौ (BhP 4.29.39-40)
यत्र भागवता राजन्साधवो विशदाशयाः।
भगवद्गुणानुकथन श्रवणव्यग्रचेतसः॥ २७४॥

तस्मिन्महन्मुखरिता मधुभिच्
चरित्रपीयूषशेषसरितः परितः स्रवन्ति।
ता ये पिबन्त्यवितृषो नृप गाढकर्णैस्
तान्न स्पृशन्त्यशनतृड्भयशोकमोहाः॥ २७५॥

पञ्चमे (BhP 5.12.13) श्रीब्राह्मणरहूगणसंवादे
यत्रोत्तमश्लोकगुणानुवादः
प्रस्तूयते ग्राम्यकथाविघातः।
निषेव्यमाणो ऽनुदिनं मुमुक्षोर्
मतिं सतीं यच्छति वासुदेवे॥ २७६॥

एकादशे श्रीभगवदुद्धवसंवादे श्रीलोपाख्यानान्ते (BhP 11.26.28-29)
तेषु नित्यं महाभाग महाभागेषु मत्कथाः।
सम्भवन्ति हि ता न्।णां जुषतां प्रपुनन्त्यघम्॥ २७७॥
ता ये शृण्वन्ति गायन्ति ह्यनुमोदन्ति चादृताः।
मत्पराः श्रद्दधानाश्च भक्तिं विन्दन्ति ते मयि॥ २७८॥

बृहन्नारदीये तत्रैव (1.4.33)
भक्तिस्तु भगवद्भक्तसङ्गेन परिजायते।

सत्सङ्गः प्राप्यते पुम्भिः सुकृतैः पूर्वसञ्चितैः ॥ २७९ ॥

एकादशे श्रीभगवदुद्धवसंवादे (BhP 11.11.49-51)
अथैतत्परमं गुह्यं शृण्वतो यदुनन्दन
सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा ॥ २८० ॥
नो रोधयति मां योगो न साङ्ख्यं धर्म एव च ।
न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा ॥ २८१ ॥
व्रतानि यज्ञश्छन्दांसि तीर्थानि नियमा यमाः ।
यथावरुन्धे सत्सङ्गः सर्वसङ्गापहो हि माम् ॥ २८२ ॥

अतवोक्तं विदुरेण तृतीयस्कन्धे (BhP 3.7.19)
यत्सेवया भगवतः कूटस्थस्य मधुद्विषः ।
रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः ॥ २८३ ॥

प्रथमस्कन्धे श्रीशौनकादीनां (BhP 1.18.13) चतुर्थे च श्रीप्रचेतसामुक्तौ (BhP 4.30.34)
तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥ २८४ ॥

चतुर्थे च श्रीप्रचेतसः प्रति श्रीशिवोपदेशः (BhP 4.24.57)
क्षणार्धेनापि तुलये न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥ २८५ ॥

द्वादशे श्रीमार्कण्डेयोपाख्याने श्रीशिवस्य (BhP 12.10.7)
अथापि संवदिष्यामो भवान्येतेन साधुना ।
अयं हि परमो लाभो नृणां साधुसमागमः ॥ २८६ ॥

अतव श्रीप्रह्लादं प्रति श्रीधरण्योक्तं हरिभक्तिसुधोदये
अक्ष्णोः फलं त्वादृशदर्शनं हि
तन्वाः फलं त्वादृशगात्रसङ्गः ।
जिह्वाफलं त्वादृशकीर्तनं हि
सुदुर्लभा भागवता हि लोके ॥ २८७ ॥

अतव विदुरेण तृतीयस्कन्धे (BhP 3.7.20)
दुरापा ह्यल्पतपसः सेवा वैकुण्ठवर्त्मसु ।
यत्रोपगीयते नित्यं देवदेवो जनार्दनः ॥ २८८ ॥

श्रीविदेहेनाप्येकादशस्कन्धे (BhP 11.2.29)
दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः।
तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम्॥ २८९॥

अतव हि प्रार्थितं श्रीध्रुवेण चतुर्थस्कन्धे (BhP 4.9.11)
भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो
भूयादनन्त महताममलाशयानाम्।
येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिं
नेष्ये भवद्गुणकथामृतपानमत्तः॥ २९०॥

प्रचेतसः प्रत्युपदेशे श्रीशिवेन च (BhP 4.24.58)
अथानघाङ्घ्रेस्तव कीर्तितीर्थयोर्
अन्तर्बहिःस्नानविधूतपाप्मनाम्।
भूतेष्वनुक्रोशसुसत्त्वशीलिनां
स्यात्सङ्गमो ऽनुग्रह एष नस्तव॥ २९१॥

श्रीप्रचेतोभिश्च (BhP 4.30.33)
यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः।
तावद्भवत्प्रसङ्गानां सङ्गः स्यान्नो भवे भवे॥ २९२॥

श्रीप्रह्लादेनापि सप्तमस्कन्धे (BhP 7.9.24)
तस्मादमूस्तनुभृतामहमाशिषो ज्ञ
आयुः श्रियं विभवमैन्द्रियमाविरिञ्च्यात्।
नेच्छामि ते विलुलितानुरुविक्रमेण
कालात्मनोपनय मां निजभृत्यपार्श्वम्॥ २९३॥ इति।

अथासत्सङ्गदोषाः। श्रीकात्यायनवाक्ये
वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः।
न शौरिचिन्ताविमुखजनसंवासवैशसम्॥ २९५॥

पाद्मे उत्तरखण्डे श्रीमामहेश्वरसंवादे
अवैष्णवास्तु ये विप्राश्चाण्डालादधमाः स्मृताः।
तेषां सम्भाषणं स्पर्शं सोमपानादि वर्जयेत्॥ २९६॥

तृतीयस्कन्धे श्रीकपिलदेवहूतिसंवादे (BhP 3.31.33-35)
सत्यं शौचं दया मौनं बुद्धिः श्रीर्ह्रीर्यशः क्षमा।

शमो दमो भगश्चेति यत्सङ्गाद्याति सङ्क्षयम्॥ २९७ ॥
तेष्वशान्तेषु मूढेषु खण्डितात्मस्वसाधुषु ।
सङ्गं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ॥ २९८ ॥
न तथास्य भवेन्मोहो बन्धश्चान्यप्रसङ्गतः ।
योषित्सङ्गाद्यथा पुंसो यथा तत्सङ्गिसङ्गतः ॥ २९९ ॥

एकादशे च श्रीभगवदुद्धवसंवादे (BhP 11.26.3)
सङ्गं न कुर्यादसतां शिश्नोदरतृपां क्वचित् ।
तस्यानुगस्तमस्यन्धे पतत्यन्धानुगान्धवत्॥ ३०० ॥

भगवद्भक्तिहीना ये मुख्याऽसन्तस्त एव हि ।
तेषां निष्ठा शुभा क्वापि न स्यात्सच्चरितैरपि ॥ ३०१ ॥

बृहन्नारदीये प्रायश्चित्तप्रकरणान्ते
किं वेदैः किमु वा शास्त्रैः किमु तीर्थनिषेवणैः ।
विष्णुभक्तिविहीनानां किं तपोभिः किमध्वरैः ॥ ३०२ ॥

श्रीगारुडे
अन्तं गतोऽपि वेदानां सर्वशास्त्रार्थवेद्यपि ।
यो न सर्वेश्वरे भक्तस्तं विद्यात्पुरुषाधमम्॥ ३०३ ॥

तृतीयस्कन्धे (BhP 3.9.10)
अह्न्यापृतार्तकरणा निशि निःशयाना
नानामनोरथधिया क्षणभग्ननिद्राः ।
दैवाहतार्थरचना ऋषयो ऽपि देव
युष्मत्प्रसङ्गविमुखा इह संसरन्ति ॥ ३०४ ॥

अतवोक्तं षष्ठे (BhP 6.1.18)
प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम् ।
न निष्पुनन्ति राजेन्द्र सुराकुम्भमिवापगाः ॥ ३०५ ॥

विष्णुधर्मोत्तरे
कुतः पापक्षयस्तेषां कुतस्तेषां च मङ्गलम् ।
येषां नैव हृदिस्थोऽयं मङ्गलायतनो हरिः ॥ ३०६ ॥

अतव बृहन्नारदीये लुब्धकोपाख्यानारम्भे

हरिपूजाविहीनाश्च वेदविद्वेषिणस्तथा ।
द्विजगोद्वेषिणश्चापि राक्षसाः परिकीर्तिताः ॥ ३०७ ॥

अतव निजदूतान्प्रति धर्मराजस्यानुशासनं षष्ठस्कन्धे (BhP 6.3.28-9)
तानानयध्वमसतो विमुखान्मुकुन्द
पादारविन्दमकरन्दरसादजस्रम् ।
निष्किञ्चनैः परमहंसकुलैरसङ्गैर्
जुष्टाद्गृहे निरयवर्त्मनि बद्धतृष्णान् ॥ ३०८ ॥
जिह्वा न वक्ति भगवद्गुणनामधेयं
चेतश्च न स्मरति तच्चरणारविन्दम् ।
कृष्णाय नो नमति यच्छिर एकदापि
तानानयध्वमसतो ऽकृतविष्णुकृत्यान् ॥ ३०९ ॥

स्कान्दे मार्कण्डेयभगीरथसंवादे
यो हि भागवतं लोकमुपहासं नृपोत्तम ।
करोति तस्य नश्यन्ति अर्थधर्मयशःसुता ॥ ३१० ॥
निन्दां कुर्वन्ति ये मूढा वैष्णवानां महात्मनाम् ।
पतन्ति पितृभिः सार्धं महारौरवसंज्ञिते ॥ ३११ ॥
हन्ति निन्दति वै द्वेष्टि वैष्णवान्नाभिनन्दति ।
क्रुध्यते याति नो हर्षं दर्शने पतनानि षट् ॥ ३१२ ॥

तत्रैवामृतसारोद्धारे श्रीयमोक्तौ
जन्मप्रभृति यत्किञ्चित्सुकृतं समुपार्जितम् ।
नाशमायाति तत्सर्वं पीडयेद्यदि वैष्णवान् ॥ ३१३ ॥

द्वारकामाहात्म्ये प्रह्लादबलिसंवादे
करपत्रैश्च फाल्यन्ते सुतीव्रैर्यमशासनैः ।
निन्दां कुर्वन्ति ये पापा वैष्णवानां महात्मनाम् ॥ ३१४ ॥
पूजितो भगवान्विष्णुर्जन्मान्तरशतैरपि ।
प्रसीदति न विश्वात्मा वैष्णवे चापमानिते ॥ ३१५ ॥

दशमस्कन्धे च (BhP 10.74.40)
निन्दां भगवतः शृण्वंस्तत्परस्य जनस्य वा ।
ततो नापैति यः सो ऽपि यात्यधः सुकृताच्च्युतः ॥ ३१६ ॥

अतवोक्तं विष्णुधर्मोत्तरे

जीवितं विष्णुभक्तस्य वरं पञ्चदिनानि च ।
न तु कल्पसहस्राणि भक्तिहीनस्य केशवे ॥ ३१७ ॥

अतवोक्तं श्रीभागवते ऐलोपाख्यानान्ते (BhP 11.26.26)
ततो दुःसङ्गमुत्सृज्य सत्सु सज्जेत बुद्धिमान् ।
सन्त एवास्य छिन्दन्ति मनोव्यासङ्गमुक्तिभिः ॥ ३१८ ॥

अथ श्रीवैष्णवसमागमविधिः

अथ श्रीभगवद्भक्तान्सल्लक्षणविभूषितान् ।
गत्वा तान्दूरतो दृष्ट्वा दण्डवत्प्रणमेन्मुदा ॥ ३१९ ॥

तेजोद्रविणपञ्चरात्रे
वैष्णवो वैष्णवं दृष्ट्वा दण्डवत्प्रणमेद्भुवि ।
उभयोरन्तरा विष्णुः शङ्खचक्रगदाधरः ॥ ३२० ॥

तत्र च विशेषो बृहन्नारदीये (1.25.41)
सभायां यज्ञशालायां देवतायतनेष्वपि ।
प्रत्येकं तु नमस्कारो हन्ति पुण्यं पुराकृतम् ॥ ३२१ ॥
पुण्यक्षेत्रे पुण्यतीर्थे स्वाध्यायसमये तथा ।
प्रत्येकं तु नमस्कारो हन्ति पुण्यं पुराकृतम् ॥ ३२२ ॥
वैष्णवं चागतं वीक्ष्याभिगम्यालिङ्ग वैष्णवम् ।
वैदेशिकं प्रीणयेयुर्दर्शयन्तः स्ववैष्णवान् ॥ ३२३ ॥

तथा चोक्तं श्रीब्रह्मणा तेजोद्रविणपञ्चरात्रे
नारायणाश्रयं भक्तं देशान्तरसमागतम् ।
प्रीणयेद्दर्शयंस्तस्य भक्त्या नारायणाश्रयान् ॥ ३२४ ॥ इति ।

ततश्च वैष्णवः प्राप्तः सन्तर्प्य वचनामृतैः ।
सद्बन्धुरिव सम्मान्योऽन्यथा दोषो महान्स्मृतः ॥ ३२५ ॥

अथ वैष्णवसम्माननित्यता

स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे
दृष्ट्वा भागवतं दैवात्सम्मुखे यो न याति हि ।
न गृह्णाति हरिस्तस्य पूजां द्वादशवार्षिकीम् ॥ ३२६ ॥

योो न गृह्णाति भूपाल वैष्णवं गृहमागतम् ।
तद्गृहं पितृभिस्त्यक्तं श्मशानमिव भीषणम् ॥ ३२७ ॥
अथवाभ्यगतं दूराद्यो नार्चयन्ति वैष्णवम् ।
स्वशक्त्या नृपशार्दूल नान्यः पापरतस्ततः ॥ ३२८ ॥
श्रान्तं भागवतं दृष्ट्वा कठिनं यस्य मानसम् ।
प्रसीदति न दुष्टात्मा श्वपचादधिको हि सः ॥ ३२९ ॥
विप्रं भागवतं दृष्ट्वा दीनमातुरमानसम् ।
न करोति परित्राणं केशवो न प्रसीदति ॥ ३३० ॥
दृष्ट्वा भागवतं विप्रं नमस्कारेण नार्चयेत् ।
देहिनस्तस्य पापस्य न च वै क्षमते हरिः ॥ ३३१ ॥
अपूजितो यदा गच्छेद्वैष्णवो गृहमेधिनः ।
शतजन्मार्जितं भूप पुण्यमादाय गच्छति ॥ ३३२ ॥
अनभ्यर्च्य पितॄन्देवान्भुञ्जते हरिवासरे ।
तत्पापं जायते भूप वैष्णवानामतिक्रमे ॥ ३३३ ॥
पूर्वं कृत्वा तु सम्मानमवज्ञां कुरुते तु यः ।
वैष्णवानां महीपाल सान्वयो याति सङ्क्षयम् ॥ ३३४ ॥

!!! Mix-Error: <...> not closed !!! pādme vaiśākhamāhātmye yamabrāhmaṇasaṁvāde
<(PadmaP 5.96.69
वैष्णवं जनमालोक्य नाभ्युत्थानं करोति यः ।
प्रणयादरतो विप्र स नरो नरकातिथिः ॥ ३३५ ॥

चतुर्थस्कन्धे (BhP 4.22.11) च
व्यालालयद्रुमा वै तेष्वरिक्ताखिलसम्पदः ।
यद्गृहास्तीर्थपादीय पादतीर्थविवर्जिताः ॥ ३३६ ॥

अथ वैष्णवस्तुतिः

स्कान्दे
दह्योऽहं कृतकृत्योऽहं यद्यूयं गृहमागताः ।
दुर्लभं दर्शनं नूनं वैष्णवानां यथा हरेः ॥ ३३७ ॥
मेरुमन्दरतुल्या वै पुण्यपुञ्जा मया कृताः ।
सम्प्राप्तं दर्शनं यद्वै वैष्णवानां महात्मनाम् ॥ ३३८ ॥

दशमस्कन्धे श्रीगर्गाचार्यं प्रति श्रीनन्दस्य वाक्यम् (BhP 10.8.4)
महद्विचलनं नृणां गृहिणां दीनचेतसाम् ।

निःश्रेयसाय भगवन्कल्पते नान्यथा क्वचित्॥ ३३९॥

चतुर्थस्कन्धे (BhP 4.22.7,10, 13-14)
अहो आचरितं किं मे मङ्गलं मङ्गलायनाः।
यस्य वो दर्शनं ह्यासीद्दुर्दर्शानां च योगिभिः॥ ३४०॥
अधना अपि ते धन्याः साधवो गृहमेधिनः।
यद्गृहा ह्यर्हवर्याम्बु तृणभूमीश्वरावराः॥ ३४१॥
कच्चिन्नः कुशलं नाथा इन्द्रियार्थार्थवेदिनाम्।
व्यसनावाप एतस्मिन्पतितानां स्वकर्मभिः॥ ३४२॥
भवत्सु कुशलप्रश्न आत्मारामेषु नेष्यते।
कुशलाकुशला यत्र न सन्त

अथ वैष्णवाभिगमनमाहात्म्यम्

स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे
सम्मुखं व्रजमानस्य वैष्णवानां नराधिप।
पदे पदे यज्ञफलं प्राहुः पौराणिका द्विजाः॥ ३४४॥

अथ वैष्णवस्तुतिमाहात्म्यम्। तत्रैव
प्रत्यक्षं वा परोक्षं वा यः प्रशंसति वैष्णवम्।
ब्रह्महा मद्यपः स्तेयी गुरुगामी सदा नृणाम्।
मुच्यते पातकात्सद्यो विष्णुराह नृपोत्तम॥ ३४५॥
किं च
प्रत्यक्षं वा परोक्षं वा ये प्रशंसन्ति वैष्णवम्।
प्रसादाद्वासुदेवस्य ते तरन्ति भवार्णवम्॥ ३४६॥

अथ वैष्णवसम्मानमाहात्म्यम्। तत्रैवामृतसारोद्धारे
श्रद्धया दत्तमन्नं च वैष्णवाग्निषु जीर्यति।
तदन्नं मेरुणा तुल्यं भवते च दिने दिने॥ ३४७॥
दैवे पैत्रे च यो दद्याद्वारिमात्रं तु वैष्णवे।
सप्तोदधिसमं भूत्वा पितृणामुपतिष्ठति॥ ३४८॥

विष्णुधर्मे
किं दानैः किं तपोभिर्वा यज्ञैश्च विविधैः कृतैः।
सर्वं सम्पद्यते पुंसां विष्णुभक्ताभिपूजनात्॥ ३४९॥
पूजयेद्वैष्णवानेतान्प्रयत्नेन विचक्षणः।

स्वशक्त्या वैष्णवेभ्यो यद्दत्तं स्यादक्षयं भवेत्॥ ३५० ॥

बृहन्नारदीये यज्ञमाल्युपाख्याने (NārP 1.36.59)
हरिभक्तिरतान्यस्तु हरिबुद्ध्या प्रपूजयेत्।
तस्य तुष्यन्ति विप्रेन्द्र ब्रह्मविष्णुमहेश्वराः॥ ३५१ ॥
हरिपूजापराणां च हरिनामरतात्मनाम्।
शुश्रूषानिरता यान्ति पापिनोऽपि परां गतिम्॥ ३५२ ॥

तत्रैव यज्ञध्वजोपाख्यानस्यारम्भे (NārP 1.39.5)
संसारसागरं तर्तुं य इच्छेन्मुनिपुङ्गव।
स भजेद्धरिभक्तानां भक्तान्वै पापहारिणः॥ ३५३ ॥

तदन्ते च (NārP 1.39.61-3, 65)
यो विष्णुभक्तान्निष्कामान्भोजयेत्श्रद्धयान्वितः।
त्रिःसप्तकुलसंयुक्तास्ते यान्ति हरिमन्दिरम्॥ ३५४ ॥
विष्णुभक्ताय यो दद्यान्निष्कामाय महात्मने।
पानीयं वा फलं वापि स एव भगवत्प्रियः॥ ३५५ ॥
विष्णुभक्तिपराणां तु शुश्रूषां कुर्वते तु ये।
ते यान्ति विष्णुभवनं यावदाभूतसम्प्लवम्॥ ३५६ ॥
देवपूजापरो यस्य गृहे वसति सर्वदा।
तत्रैव सर्वदेवाश्च तिष्ठन्ति श्रीहरिस्तथा॥ ३५७ ॥

लैङ्गे
नारायणपरो विद्वान्यस्यान्नं प्रीतमानसः।
अश्नाति तद्धरेरास्यं गतमन्नं न संशयः॥ ३५८ ॥
सर्वार्चनादपि विश्वात्मा प्रीतो भवति माधवः।
दृष्ट्वा भागवतस्यान्नं स भुङ्क्ते भक्तवत्सलः॥ ३५९ ॥

ब्राह्मे श्रीभगवद्वाक्यम्
नैवेद्यं पुरतो न्यस्तं दृष्ट्वैव स्वीकृतं मया।
भक्तस्य रसनाग्रेण रसमश्नामि पद्मज॥ ३६० ॥

पाद्मोत्तरखण्डे (253.176-8) श्रीशिवोमासंवादे
आराधनानां सर्वेषां विष्णोराराधनं परम्।
तस्मात्परतरं देवि तदीयानां समर्चनम्॥ ३६१ ॥
अर्चयित्वापि गोविन्दं तदीयान्नार्चयेत्पुनः।

न स भागवतो ज्ञेयः केवलं दाम्भिकः स्मृतः ॥ ३६२ ॥
पुमांस्तस्मात्प्रयत्नेन वैष्णवान्पूजयेत्सदा ।
सर्वं तरति दुःखौघं महाभागवतार्चनात् ॥ ३६३ ॥

एकादशे श्रीभगवद्वाक्यम् (BhP 11.11.44, 11.19.21)
वैष्णवे बन्धुसत्कृत्या ॥ ३६४ ॥
मद्भक्तपूजाभ्यधिका ॥ ३६५ ॥

किं च स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे
कर्मणा मनसा वाचा येऽर्चयन्ति सदा हरिम् ।
तेषां वाक्यं नरैः कार्यं ते हि विष्णुसमा नराः ॥ ३६६ ॥

इत्यादृतोऽनुशृणुयाद्भक्तिशास्त्राणि तत्र च ।
श्रीभागवतमत्रापि कृष्णलीलाकथां मुहुः ॥ ३६७ ॥

अथ वैष्णवशास्त्रमाहात्म्यम् ।

स्कान्दे श्रीब्रह्मनारदसंवादे
वैष्णवानि तु शास्त्राणी ये शृण्वन्ति पठन्ति च ।
धन्यास्ते मानवा लोके तेसां कृष्णः प्रसीदति ॥ ३६८ ॥
वैष्णवानि तु शास्त्राणी ये ऽर्चयन्ति गृहे नराः ।
सर्वपापविनिर्मुक्ता भवन्ति सुरवन्दिताः ॥ ३६९ ॥
सर्वस्वेनापि विप्रेन्द्र कर्तव्यः शास्त्रसङ्ग्रहः ।
वैष्णवैस्तु महाभक्त्या तुष्ट्यर्थं चक्रपाणिनः ॥ ३७० ॥
तिष्ठते वैष्णवं शास्त्रं लिखितं यस्य मन्दिरे ।
तत्र नारायणो देवः स्वयं वसति नारद ॥ ३७१ ॥
पौराणं वैष्णवं श्लोकं श्लोकार्धमथवापि च ।
श्लोकपादं पठेद्यस्तु गोसहस्रफलं लभेत् ॥ ३७२ ॥
देवतानामृषीणां च योगिनामपि दुर्लभम् ।
विप्रेन्द्र वैष्णवं शास्त्रं मनुष्याणां च का कथा ॥ ३७३ ॥

तत्रैव श्रीकृष्णार्जुनसंवादे
मम शास्त्राणि ये नित्यं पूजयन्ति पठन्ति च ।
ते नराः कुरुशार्दूल ममातिथ्यं गताः सदा ॥ ३७४ ॥
मम शाख्यप्रवक्तारं मम शास्त्रानुचिन्तकम् ।
चिन्तयामि न सन्देहो नरं तं चात्मवत्सदा ॥ ३७५ ॥

अथ श्रीमद्भागवतमाहात्म्यम्

तत्रैव

जीवितादधिकं येषां शास्त्रं भागवतं कलौ।
न तेषां भवति क्लेशो याम्यः कल्पशतैरपि॥ ३७६॥
धारयन्ति गृहे नित्यं शास्त्रं भागवतं हि ये।
आस्फोटयन्ति वल्गन्ति तेषां प्रीताः पितामहाः॥ ३७७॥
यावद्दिनानि विप्रर्षे शास्त्रं भागवतं गृहे।
तावत्पिबन्ति पितरः क्षीरं सर्पिर्मधूदकम्॥ ३७८॥
येऽर्चयन्ति सदा गेहे शास्त्रं भागवतं नराः।
प्रीणितास्तैश्च विबुधा यावदाहूतसम्प्लवम्॥ ३७९॥
यच्छन्ति वैष्णवे भक्त्या शास्त्रं भागवतं हि ये।
कल्पकोटिसहस्राणि विष्णुलोके वसन्ति ते॥ ३८०॥
श्लोकार्धं श्लोकपादं वा वरं भागवतं गृहे।
शतशोऽथ सहस्रैश्च किमन्यैः शास्त्रसङ्ग्रहैः॥ ३८१॥
न यस्य तिष्ठते गेहे शास्त्रं भागवतं कलौ।
न तस्य पुनरावृत्तिर्याम्यात्पाशात्कदाचन॥ ३८२॥
कथं स वैष्णवो ज्ञेयः शास्त्रं भागवतं कलौ।
गृहे न तिष्ठते यस्य स विप्रः श्वपचाधमः॥ ३८३॥
यत्र यत्र भवेद्विप्र शास्त्रं भागवतं कलौ।
तत्र तत्र हरिर्याति त्रिदशैः सह नारद॥ ३८४॥
तत्र सर्वाणि तीर्थानि नदीनदसरांसि च।
यत्र भागवतं शास्त्रं तिष्ठते मुनिसत्तम॥ ३८५॥
तत्र सर्वाणि तीर्थानि सर्वे यज्ञाः सुदक्षिणाः।
यत्र भागवतं शास्त्रं पूजितं तिष्ठते गृहे॥ ३८६॥

किं च

नित्यं भागवतं यस्तु पुराणं पठते नरः।
प्रत्यक्षरं भवेत्तस्य कपिलादानजं फलम्॥ ३८७॥
श्लोकार्धं श्लोकपादं वा नित्यं भागवतोद्भवम्।
पठेत्शृणोति वा भक्त्या गोसहस्रं फलं लभेत्॥ ३८८॥
यः पठेत्प्रयतो नित्यं श्लोकं भागवतं मुने।
अष्टादशपुराणानां फलं प्राप्नोति मानवः॥ ३८९॥

तत्रैव मार्कण्डेयभगीरथसंवादे

यो हि भागवते शास्त्रे विघ्नमाचरते पुमान्।
नाभिनन्दति दुष्टात्मा कुलानां पातयेच्छतम्॥ ३९० ॥

पाद्मे गौतमाम्बरीषसंवादे
अम्बरीष शुकप्रोक्तं नित्यं भागवतं शृणु।
पठस्व स्वमुखेनापि यदीच्छसि भवक्षयम्॥ ३९१ ॥
श्लोकं भागवतं वापि श्लोकर्धपादमेव वा।
लिखितं तिष्ठते यस्य गृहे तस्य सदा हरिः।
वसते नात्र सन्देहो देवदेवो जनार्दनः॥ ३९२ ॥

द्वारकामाहात्म्ये श्रीमार्कण्डेयेन्द्रद्युम्नसंवादे
श्रीमद्भागवतं शास्त्रं पठते कृष्णसन्निधौ।
कुलकोटिशतैर्युक्तः क्रीडते योगिभिः सह॥ ३९३ ॥

गारुडे
अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः।
गायत्रीभाष्यरूपोऽसौ वेदार्थपरिबृंहितः॥ ३९४ ॥
पुराणानां सामरूपः साक्षाद्भगवतोदितः।
द्वादशस्कन्धयुक्तोऽयं शतविच्छेदसंयुतः।
ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः॥ ३९५ ॥

तस्मिन्नेव श्रीभागवते प्रथमस्कन्धे (BhP 1.1.2, 1.3.40-41)
धर्मः प्रोज्झितकैतवो ऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यते ऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥ ३९६ ॥

इदं भागवतं नाम पुराणं ब्रह्मसम्मितम्।
उत्तमश्लोकचरितं चकार भगवानृषिः॥ ३९७ ॥
निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत्।
तदिदं ग्राहयामाससुतमात्मवतां वरम्।
सर्ववेदेतिहासानां सारं सारं समुद्धृतम्॥ ३९८ ॥

किं च (BhP 1.3.43)
कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह।
कलौ नष्टदृशामेष पुराणार्को ऽधुनोदितः॥ ३९९ ॥

किं च  (BhP 1.7.67)
अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे ।
लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम् ॥ ४०० ॥
यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे ।
भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा ॥ ४०१ ॥

द्वितीये श्रीशुकोक्तौ  (BhP 2.1.9-10)
परिनिष्ठितो ऽपि नैर्गुण्य उत्तमश्लोकलीलया ।
गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥ ४०२ ॥
राजन्ते तावदन्यानि पुराणानि सतां गणे ।
यावद्भागवतं नैव श्रूयते ऽमृतसागरम् ॥ ४०३ ॥

द्वादशे च  (BhP 12.13.14, 16, 18)
राजन्ते तावदन्यानि पुराणानि सतां गणे ।
यावद्भागवतं नैव श्रूयतेऽमृतसागरः ॥ ४०४ ॥
सर्ववेदान्तसारं हि श्रीभागवतमिष्यते ।
तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् ॥ ४०५ ॥
निम्नगानां यथा गङ्गा देवानामच्युतो यथा ।
वैष्णवानां यथा शम्भुः पुराणानामिदं तथा ॥ ४०६ ॥

श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं
यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते ।
तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं
तच्छृण्वन्सुपठन्विचारणपरो भक्त्या विमुच्येन्नरः ॥ ४०७ ॥

अतवोक्तं  (BhP 1.1.3)
निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः ॥ ४०८ ॥

किं च  (BhP 1.2.3)
यः स्वानुभावमखिलश्रुतिसारमेकम्
अध्यात्मदीपमतितितीर्षतां तमो ऽन्धम् ।
संसारिणां करुणयाह पुराणगुह्यं

तं व्यासमूनुमुपयामि गुरुं मुनीनाम् ॥ ४०९ ॥

अथ श्रीभगवच्छास्त्रवक्तृमाहात्म्यम्

भगवद्धर्मवक्तारं भगवच्छास्त्रवाचकम् ।
वैष्णवं गुरुवद्भक्त्या पूजयेज्ज्ञानदायकम् ॥ ४१० ॥

नारदपञ्चरात्रे ऋषीन्प्रति श्रीशाण्डिल्योक्तौ
वैष्णवं ज्ञानवक्तारं यो विद्याद्विष्णुवद्गुरुम् ।
पूजयेद्वाङ्मनःकायैः स शास्त्रज्ञः स वैष्णवः ॥ ४११ ॥
श्लोकपादस्य वक्तापि यः पूज्यः स सदैव हि ।
किं पुनर्भगवद्विष्णोः स्वरूपं वितनोति यः ॥ ४१२ ॥

किं च
नारायणः परं ब्रह्म तज्ज्ञानेनाथ गम्यते ।
ज्ञानस्य साधनं शास्त्रं शास्त्रं च गुरुवक्त्रगम् ॥ ४१३ ॥
ब्रह्म प्राप्तिरतो हेतोर्गुर्वधीना सदैव हि ।
हेतुनानेन वै विप्रा गुरुर्गुरुतरः स्मृतः ॥ ४१४ ॥
यस्माद्देवो जगन्नाथः कृत्वा मर्यमयीं तनुम् ।
मग्नानुद्धरते लोकान्कारुण्याच्छास्त्रपाणिना ॥ ४१५ ॥
तस्माद्भक्तिर्गुरौ कार्या संसारभयभीरुणा ।
शास्त्रज्ञानेन योऽज्ञानं तिमिरं विनिपातयेत् ॥ ४१६ ॥
शास्त्रं पापहरं पुण्यं पवित्रं भोगमोक्षदम् ।
शान्तिदं च महार्थं च वक्ति यः स जगद्गुरुः ॥ ४१७ ॥

अथ श्रीकृष्णलीलाकथाश्रवणमाहात्म्यम्
तत्र पापादिशोधकत्वम्

स्कान्दे ब्रह्मनारदसंवादे
तेषां क्षीणं महत्पापं वर्षकोटिशतोद्भवम् ।
विप्रेन्द्र नास्ति सन्देहो ये शृण्वन्ति हरेः कथाम् ॥ ४१८ ॥

तत्रैवान्यत्र
सर्वाश्रमाभिगमनं सर्वतीर्थावगाहनम् ।
न तथा पारणं नृणां नारायणकथा यथा ॥ ४१९ ॥

बृहन्नारदीये (1.39.2) यज्ञध्वजोपाख्यानान्ते
अहो हरिकथा लोके पापघ्नी पुण्यदायिनी।
शृण्वतां वदतां चैव तद्भक्तानां विशेषतः॥ ४२०॥

प्रथमस्कन्धे (BhP 1.2.17)
शृण्वतां स्वकथाः कृष्णः पुण्यश्रवणकीर्तनः।
हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत्सताम्॥ ४२१॥

एकादशे च देवस्तुतौ (BhP 11.6.9)
शुद्धिर्नृणां न तु तथेड्य दुराशयानां
विद्याश्रुताध्ययनदानतपःक्रियाभिः।
सत्त्वात्मनामृषभ ते यशसि प्रवृद्ध
सच्छ्रद्धया श्रवणसम्भृतया यथा स्यात्॥ ४२२॥

दशमे (BhP 10.1.13) श्रीबादरायणिं प्रति श्रीपरीक्षिदुक्तौ
नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते।
पिबन्तं त्वन्मुखाम्भोज च्युतं हरिकथामृतम्॥ ४२३॥

स्कान्दे च तत्रैव
श्रीप्रदं विष्णुचरितं सर्वोपद्रवनाशनम्।
सर्वदुःखोपशमनं दुष्टग्रहनिवारणम्॥ ४२४॥

अथ प्रकर्षेण सर्वमङ्गलकारित्वम्

तत्रैव
श्रोतव्यं साधुचरितं यशोधर्मजयार्थिभिः।
पापक्षयार्थं देवर्षे स्वर्गार्थं धर्मबुद्धिभिः॥ ४२५॥
आयुष्यामारोग्यकरं यशस्यं पुण्यवर्धनम्।
चरितं वैष्णवं नित्यं श्रोतव्यं साधुबुद्धिना॥ ४२६॥
कुटुम्बवृद्धिं विजयं शत्रुनाशं बलम्।
करोति विष्णुचरितं सर्वकालफलप्रदम्॥ ४२७॥

प्रथमस्कन्धे (BhP 1.2.8)
धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः।
नोत्पादयेद्यदि रतिं श्रम एव हि केवलम्॥ ४२८॥

तृतीये श्रीविदुरमैत्रेयसंवादे (BhP 3.6.37)
एकान्तलाभं वचसो नु पुंसां
सुश्लोकमौलेर्गुणवादमाहुः।
श्रुतेश्च विद्वद्भिरुपाकृतायां
कथासुधायामुपसम्प्रयोगम्॥ ४२९॥

द्वितीये श्रीशौनकोक्तौ (BhP 2.3.17)
आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ।
तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया॥ ४३०॥

तृतीये श्रीविदुरोक्तौ (BhP 3.5.13)
सा श्रद्दधानस्य विवर्धमाना
विरक्तिमन्यत्र करोति पुंसः।
हरेः पदानुस्मृतिनिर्वृतस्य
समस्तदुःखाप्ययमाशु धत्ते॥ ४३१॥

चतुर्थे श्रीपृथुचरितान्ते श्रीमैत्रेयोक्तौ (BhP 4.23.12)
छिन्नान्यधीरधिगतात्मगतिर्निरीहस्
तत्तत्यजे ऽच्छिनदिदं वयुनेन येन।
तावन्न योगगतिभिर्यतिरप्रमत्तो
यावद्गदाग्रजकथासु रतिं न कुर्यात्॥ ४३२॥

एकादशे च श्रीभगवन्तं प्रत्युद्धववाक्ये (BhP 11.6.44)
तव विक्रीडितं कृष्ण नृणां परममङ्गलम्।
कर्णपीयूषमासाद्य त्यजन्त्यन्यस्पृहां जनाः॥ ४३३॥

चतुर्थे प्रचेतसः प्रति श्रीभगवदुक्तौ (BhP 4.30.19)
गृहेष्वाविशतां चापि पुंसां कुशलकर्मणाम्।
मद्वार्तायातयामानां न बन्धाय गृहा मताः॥ ४३४॥

स्कान्दे तत्रैव
धर्मार्थकाममोक्षाणां यदिष्टं च नृणामिह।
तत्सर्वं लभते वत्स कथां श्रुत्वा हरेः सदा॥ ४३५॥

द्वादशे च श्रीशुकोक्तौ (BhP 12.4.40)
संसारसिन्धुमतिदुस्तरमुत्तितीर्षोर्

नान्यः प्लवो भगवतो पुरुषोत्तमस्य ।
लीलाकथारसनिषेवनमन्तरेण
पुंसो भवेद्विविधदुःखदवार्दितस्य ॥ ४३६ ॥

द्वारकामाहात्म्ये
नित्यं कृष्णकथा यस्य प्राणादपि गरीयसी ।
न तस्य दुर्लभं किञ्चिदिह लोके परत्र च ॥ ४३७ ॥

द्वितीयस्कन्धे (BhP 2.3.12)
ज्ञानं यदाप्रतिनिवृत्तगुणोर्मिचक्रम्
आत्मप्रसाद उत यत्र गुणेष्वसङ्गः ।
कैवल्यसम्मतपथस्त्वथ भक्तियोगः
को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥ ४३८ ॥

दशमस्कन्धे श्रुतिस्तुतौ (BhP 10.87.21)
दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्
चरितमहामृताब्धिपरिवर्तपरिश्रमणाः ।
न परिलषन्ति केचिदपवर्गमपीश्वर ते
चरणसरोजहंसकुलसङ्गविसृष्टगृहाः ॥ ४३९ ॥

तृतीयस्कन्धे श्रीकपिलदेवहूतिसंवादे (BhP 3.25.34)
नैकात्मतां मे स्पृहयन्ति केचिन्
मत्पादसेवाभिरता मदीहाः ।
ये ऽन्योन्यतो भागवताः प्रसज्य
सभाजयन्ते मम पौरुषाणि ॥ ४४० ॥

द्वितीये श्रीसूतोक्तौ (BhP 2.2.37)
पिबन्ति ये भगवत आत्मनः सतां
कथामृतं श्रवणपुटेषु सम्भृतम्
पुनन्ति ते विषयविदूषिताशयं
व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥ ४४१ ॥

तृतीये कपिलदेवस्तुतौ (BhP 3.5.45)
पानेन ते देव कथासुधायाः
प्रवृद्धभक्त्या विशदाशया ये ।
वैराग्यसारं प्रतिलभ्य बोधं

यथाञ्जसान्वीयुरकुण्ठधिष्ण्यम् ॥ ४४२ ॥

स्कान्दे अमृतसारोद्धारे श्रीयमस्य दूतानुशासने
ये शृण्वन्ति कथां विष्णोर्ये पठन्ति हरेः कथाम् ।
कलायुतं नावलोक्यं गतास्ते ब्रह्म शाश्वतम् ॥ ४४३ ॥
यस्य विष्णुकथालापैर्नित्यं प्रमुदितं मनः ।
तस्य न च्यवते लक्ष्मीस्तत्पदं च करे स्थितम् ॥ ४४४ ॥

द्वादशे (BhP 12.3.15)
यत्तूत्तमःश्लोकगुणानुवादः
सङ्गीयते ऽभीक्ष्णममङ्गलघ्नः ।
तमेव नित्यं शृणुयादभीक्ष्णं
कृष्णे ऽमलां भक्तिमभीप्समानः ॥ ४४५ ॥

स्कान्दे
यत्र यत्र महीपाल वैष्णवी वर्तते कथा ।
तत्र तत्र हरिर्याति गौर्यथा सुतवत्सला ॥ ४४६ ॥

श्रीविष्णुधर्मे श्रीभगवदुक्तौ स्कान्दे च श्रीभगवदर्जुनसंवादे
मत्कथावाचकं नित्यं मत्कथाश्रवणे रतम् ।
मत्कथाप्रीतमनसं नाहम्त्यक्ष्यामि तं नरम् ॥ ४४७ ॥

दशमस्कन्धे ब्रह्मस्तुतौ (BhP 10.14.3)
ज्ञाने प्रयासमुदपास्य नमन्त एव
जीवन्ति सन्मुखरितां भवदीयवार्ताम् ।
स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभिर्
ये प्रायशो ञ्जित जितो ऽप्यसि तैस्त्रिलोक्याम् ॥ ४४८ ॥

तृतीये श्रीसनकादिस्तुतौ (BhP 3.15.48)
नात्यन्तिकं विगणयन्त्यपि ते प्रसादं
किं वान्यदर्पितभयं भ्रुव उन्नयैस्ते ।
ये ऽङ्ग त्वदङ्घ्रिशरणा भवतः कथायाः
कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥ ४४९ ॥

चतुर्थे श्रीभगवन्तं प्रति सिद्धानां स्तुतौ (BhP 4.7.35)
अयं त्वत्कथामृष्टपीयूषनद्यां

मनोवारणः क्लेशदावाग्निदग्धः ।
तृषार्तो ऽवगाढो न सस्मार दावं
न निष्क्रामति ब्रह्मसम्पन्नवन्नः ॥ ४५० ॥

अतवोक्तं प्रथमस्कन्धे श्रीशौनकादिभिः (BhP 1.1.19)
वयं तु न वितृप्याम उत्तमश्लोकविक्रमे ।
यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥ ४५१ ॥

किं च (BhP 1.18.14)
को नाम तृप्येद्रसवित्कथायां
महत्तमैकान्तपरायणस्य ।
नान्तं गुणानामगुणस्य जग्मुर्
योगेश्वरा ये भवपाद्ममुख्याः ॥ ४५२ ॥

तृतीये श्रीविदुरेण (BhP 3.5.7)
क्रीडन्विधत्ते द्विजगोसुराणां
क्षेमाय कर्माण्यवतारभेदैः ।
मनो न तृप्यत्यपि शृण्वतां नः
सुश्लोकमौलेश्चरितामृतानि ॥ ४५३ ॥

दशमस्कन्धे च श्रीपरीक्षिता (BhP 10.52.20)
ब्रह्मन्कृष्णकथाः पुण्या माध्वीर्लोकमलापहाः ।
को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनः ॥ ४५४ ॥

अतो हि श्रीपृथुराजेन प्रार्थितं (BhP 4.20.24)
न कामये नाथ तदप्यहं क्वचिन्
न यत्र युष्मच्चरणाम्बुजासवः ।
महत्तमान्तर्हृदयान्मुखच्युतो
विधत्स्व कर्णायुतमेष मे वरः ॥ ४५५ ॥

अतव निश्चयोक्तं पाद्मे वैशाखमाहात्म्ये (PadmaP 5.85.41) अम्बरीषं प्रति श्रीनारदेन
नातः परं परमतोषविशेषपोषं
पश्यामि पुण्यमुचितं च परस्परेण ।
सन्तः प्रसह्य यदनन्तगुणाननन्त
श्रेयोनिधीनधिकभावभुजो भजन्ति ॥ ४५६ ॥

प्रथमस्कन्धे श्रीसूतेन (BhP 1.18.10)
या याः कथा भगवतः कथनीयोरुकर्मणः।
गुणकर्माश्रयाः पुम्भिः संसेव्यास्ता बुभूषुभिः॥ ४५७॥

दशमस्कन्धशेषे च श्रीबादरायणिना (BhP 10.90.49)
इत्थं परस्य निजवर्त्मरिरक्षयात्त
लीलातनोस्तदनुरूपविडम्बनानि।
कर्माणि कर्मकषणानि यदूत्तमस्य
श्रूयादमुष्य पदयोरनुवृत्तिमिच्छन्॥ ४५८॥

अथ श्रीभगवत्कथात्यागादिदोषः

अतः कृष्णकथायां तु सत्यामन्यकथाश्रुतिम्।
तदश्रुतिं च वैमुख्यं तस्यां तृप्तिमपि त्यजेत्॥ ४५९॥

तृतीयस्कन्धे कपिलदेवहूतिसंवादे (BhP 3.32.19)
नूनं दैवेन विहता ये चाच्युतकथासुधाम्।
हित्वा शृण्वन्त्यसद्गाथाः पुरीषमिव विड्भुजः॥ ४६०॥

तत्रैव श्रीवैकुण्ठवर्णने (BhP 3.15.23)
यन्न व्रजन्त्यघभिदो रचनानुवादाच्
छृण्वन्ति ये ऽन्यविषयाः कुकथा मतिघ्नीः।
यास्तु श्रुता हतभगैर्नृभिरात्तसारास्
तांस्तान्क्षिपन्त्यशरणेषु तमःसु हन्त॥ ४६१॥

किं च स्कान्दे ब्रह्मनारदसंवादे
वाच्यमानं तु ये शास्त्रं वैष्णवं पुरुषाधमाः।
न शृण्वन्ति मुनिश्रेष्ठ तेषां स्वामी सदा यमः॥ ४६२॥
न शृण्वन्ति न हृष्यन्ति वैष्णवीं प्राप्य ये कथाम्।
धम आयुर्यशो धर्मः सन्तानश्चैव नश्यति॥ ४६३॥
न शृणोति हरेर्यस्तु कथां पापप्रणाशिनीम्।
अचिरादेव देवर्षे समूलं तु विनश्यति॥ ४६४॥

द्वितीयस्कन्धे श्रीशौनकोक्तौ (BhP 2.3.20)
बिले बतोरुक्रमविक्रमान्ये
न शृण्वतः कर्णपुटे नरस्य।

जिह्वासती दार्दुरिकेव सूत
न चोपगायत्युरुगायगाथाः ॥ ४६५ ॥

तृतीये श्रीब्रह्मस्तुतौ (BhP 3.9.7)
दैवेन ते हतधियो भवतः प्रसङ्गात्
सर्वाशुभोपशमनाद्विमुखेन्द्रिया ये ।
कुर्वन्ति कामसुखलेशलवाय दीना
लोभाभिभूतमनसो ऽकुशलानि शश्वत् ॥ ४६६ ॥

(BhP 3.5.14)
ताञ्छोच्यशोच्यानविदो ऽनुशोचे
हरेः कथायां विमुखानघेन ।
क्षिणोति देवो ऽनिमिषस्तु येषाम्
आयुर्वृथावादगतिस्मृतीनाम् ॥ ४६७ ॥

श्रीमैत्रेयोक्तौ च (BhP 3.13.50)
को नाम लोके पुरुषार्थसारवित्
पुराकथानां भगवत्कथासुधाम् ।
आपीय कर्णाञ्जलिभिर्भवापहाम्
अहो विरज्येत विना नरेतरम् ॥ ४६८ ॥

चतुर्थे श्रीपृथुस्तुतौ (BhP 4.20.26)
यशः शिवं सुश्रव आर्यसङ्गमे
यदृच्छया चोपशृणोति ते सकृत् ।
कथं गुणज्ञो विरमेद्विना पशुं
श्रीर्यत्प्रवव्रे गुणसङ्ग्रहेच्छया ॥ ४६९ ॥

दशमारम्भे श्रीपरीक्षित्प्रश्ने (BhP 10.1.4)
निवृत्ततर्षैरुपगीयमानाद्
भवौषधाच्छ्रोत्रमनोऽभिरामात् ।
क उत्तमश्लोकगुणानुवादात्
पुमान्विरज्येत विना पशुघ्नात् ॥ ४७० ॥

अतवोक्तं देवैः पञ्चमस्कन्धे (BhP 5.19.23)
न यत्र वैकुण्ठकथासुधापगा
न साधवो भागवतास्तदाश्रयाः ।

न यत्र यज्ञेशमखा महोत्सवाः
सुरेशलोको ऽपि न वै स सेव्यताम्॥ ४७१॥

अथ भगवत्कथासक्तिः

अतो निषेव्यमाणां च सर्वथा भगवत्कथाम्।
मुहुस्तद्रसिकान्पृच्छेन्मिथो मोदविवृद्धये॥ ४७१॥

दशमस्कन्धे (BhP 10.13.2)
सतामयं सारभृतां निसर्गो
यदर्थवाणीश्रुतिचेतसामपि।
प्रतिक्षणं नव्यवदच्युतस्य यत्
स्त्रिया विटानामिव साधु वार्ता॥ ४७३॥

अतव तत्रैव (BhP 10.87.11)
तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः।
अपि चक्रुः प्रवचनमेकं शुश्रूषवो ऽपरे॥ ४७४॥ इति।

अथ श्रीभगवद्धर्मप्रतिपादनमाहात्म्यम्

तथा वैष्णवधर्मांश्च क्रियमानामपि स्वयम्।
सम्पृच्छेत्तद्विदः साधूनन्योन्यप्रीतिवृद्धये॥ ४७५॥
श्रद्धया भगवद्धर्मान्वैष्णवायानुपृच्छते।
अवश्यं कथयेद्विद्वानन्यथा दोषभाग्भवेत्॥ ४७६॥

तदुक्तम्
नाख्याति वैष्णवं धर्मं विष्णुभक्तस्य पृच्छतः।
कलौ भागवतो भूत्वा पुण्यं याति शताब्दिकम्॥ ४७७॥

स्कान्दे ब्रह्मनारदसंवादे
वैष्णवे वैष्णवं धर्मं यो ददाति द्विजोत्तमः।
ससागरमहीदाने यत्फलं लभतेऽधिकम्॥ ४७८॥

किं च तत्रैव
अज्ञानाय च यो ज्ञानं दद्याद्धर्मोपदेशनम्।
कृत्स्नां वा पृथिवीं दद्यात्तेन तुल्यं हि तत्स्मृतम्॥ ४७९॥

विष्णुधर्मोत्तरे (3.341.50)
तत्कथां श्रावयेद्यस्तु तद्भक्तान्मानवोत्तमः।
गोदानफलमाप्नोति स नरस्तेन कर्मणा॥ ४८०॥

पाद्मे देवदूतविकुण्डलसंवादे (PadmaP 3.31.97)
ज्ञानमज्ञाय यो दद्याद्वेदशास्त्रसमुद्भवम्।
अपि देवास्तमर्चन्ति भवबन्धविदारकम्॥ ४८१॥

बृहन्नारदीये (NārP 1.1.63)
सत्सङ्गदेवार्चनसत्कथासु
हितोपदेशे निरतो मनुष्यः।
प्रयाति विष्णोः परमं पदं यद्
देहावसानेऽच्युततुल्यतेजाः॥ ४८२॥

अथ भगवद्धर्माः

ते च श्रीभगवद्धर्मा भगवद्भक्तलक्षणैः।
व्यञ्जिताः कतिचिन्मुख्या लिख्यन्तेऽत्र परेऽपि ते॥ ४८३॥
ते तु यद्यपि विख्याताः श्रीमद्भागवतादिषु।
तथापि यत्नादेकत्र सङ्गृह्यन्ते समाधनाः॥ ४८४॥

ते चोक्ताः काशीखण्डे द्वारकामाहात्म्ये चन्द्रशर्मणा
अद्य प्रभृति कर्तव्यं यन्मया कृष्ण तच्छृणु।
एकादश्यां न भोक्तव्यं कर्तव्यो जागरः सदा॥ ४८५॥
महोत्सवः प्रकर्तव्यः प्रत्यहपूजनं तव।
पलार्धेनापि बिद्धं तु भोक्तव्यं वासरान्तरे॥ ४८६॥
त्वत्प्रीत्याष्टौ मया कार्या द्वादश्यो व्रतसंयुता।
भक्तिर्भागवती कार्या प्राणैरपि धनैरपि॥ ४८७॥
नित्यं नामसहस्रं तु पठनीयं तव प्रियम्।
पूजा तु तुलसीपत्रैर्मया कार्या सदैव हि॥ ४८८॥
तुलसीकाष्ठासम्भूता माला कार्या सदा मया।
नृत्यगीतं प्रकर्तव्यं सम्प्राप्ते जागरे तव॥ ४८९॥
तुलसीकाष्ठासम्भूतचन्दनेन विलेपनम्।
करिष्यामि तवाग्रे च गुणानां तव कीर्तनम्॥ ४९०॥
मथुरायां प्रकर्तव्यं प्रत्यब्दं गमनं मया।

तत्कथाश्रवणं कार्यं तथा पुस्तकवाचनम् ॥ ४९१ ॥
नित्यं पादोदकं मूर्ध्ना मया धार्यं प्रयत्नतः ।
नैवेद्यभक्षणं चापि करिष्यामि यतव्रतः ॥ ४९२ ॥
निर्माल्यं शिरसा धार्यं त्वदीयं सादरं मया ।
तव दत्त्वा यदिष्टं तु भक्षणीयं मुदा मया ॥ ४९३ ॥
तथा तथा प्रकर्तव्यं तव तुष्टिः प्रजायते ।
सत्यमेतन्मया कृष्ण तवाग्रे परिकीर्तनम् ॥ ४९४ ॥

सप्तमस्कन्धे श्रीप्रह्लादेन (BhP 7.7.30-32)
गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च ॥
श्रद्धया तत्कथायां च कीर्तनैर्गुणकर्मणाम् ।
तत्पादाम्बुरुहध्यानात्तल्लिङ्गेक्षार्हणादिभिः ॥ ४९५ ॥
हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः ।
इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥ ४९६ ॥

एकादशे च श्रीकवियोगेश्वरेण (BhP 11.2.34)
ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये ।
अञ्जः पुंसामविदुषां विद्धि भागवतान्हि तान् ॥ ४९७ ॥

तत्रैव प्रबुद्धयोगेश्वरेण (BhP 11.3.23-30)
सर्वतो मनसो ऽसङ्गमादौ सङ्गं च साधुषु ।
दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितम् ॥ ४९८ ॥
शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवम् ।
ब्रह्मचर्यमहिंसां च समत्वं द्वन्द्वसंज्ञयोः ॥ ४९९ ॥
सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेतताम् ।
विविक्तचीरवसनं सन्तोषं येन केनचित् ॥ ५०० ॥
श्रद्धां भागवते शास्त्रे ऽनिन्दामन्यत्र चापि हि ।
मनोवाक्कर्मदण्डं च सत्यं शमदमावपि ॥ ५०१ ॥
श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः ।
जन्मकर्मगुणानां च तदर्थे ऽखिलचेष्टितम् ॥ ५०२ ॥
इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम् ।
दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनम् ॥ ५०३ ॥
एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम् ।
परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥ ५०४ ॥
परस्परानुकथनं पावनं भगवद्यशः
मिथो रतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥ ५०५ ॥

श्रीभगवता च (BhP 11.11.34-41)
मल्लिङ्गमद्भक्तजन दर्शनस्पर्शनार्चनम् ।
परिचर्या स्तुतिः प्रह्व गुणकर्मानुकीर्तनम् ॥ ५०६ ॥
मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव ।
सर्वलाभोपहरणं दास्येनात्मनिवेदनम् ॥ ५०७ ॥
मज्जन्मकर्मकथनं मम पर्वानुमोदनम् ।
गीतताण्डववादित्र गोष्ठीभिर्मद्गृहोत्सवः ॥ ५०८ ॥
यात्रा बलिविधानं च सर्ववार्षिकपर्वसु ।
वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम् ॥ ५०९ ॥
ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः ।
उद्यानोपवनाक्रीड पुरमन्दिरकर्मणि ॥ ५१० ॥
सम्मार्जनोपलेपाभ्यां सेकमण्डलवर्तनैः ।
गृहशुश्रूषणं मह्यं दासवद्यदमायया ॥ ५११ ॥
अमानित्वमदम्भित्वं कृतस्यापरिकीर्तनम् ।
अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितम् ॥ ५१२ ॥
यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः ।
तत्तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते ॥ ५१३ ॥

किं च (BhP 11.19.20-23)
श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनम् ।
परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम ॥ ५१४ ॥
आदरः परिचर्यायां सर्वाङ्गैरभिवन्दनम् ।
मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥ ५१५ ॥
मदर्थेष्वङ्गचेष्टा च वचसा मद्गुणेरणम् ।
मय्यर्पणं च मनसः सर्वकामविवर्जनम् ॥ ५१६ ॥
मदर्थे ऽर्थपरित्यागो भोगस्य च सुखस्य च ।
इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः ॥ ५१७ ॥

अपि चाग्रे (BhP 11.29.9-12)
कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् ।
मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः ॥ ५१८ ॥
देशान्पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् ।
देवासुरमनुष्येषु मद्भक्ताचरितानि च ॥ ५१९ ॥
पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान् ।
कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ॥ ५२० ॥

मामेव सर्वभूतेषु बहिरन्तरपावृतम्।
ईक्षेतात्मनि चात्मानं यथा खममलाशयः॥ ५२१॥

अथ श्रीभगवद्धर्ममाहात्म्यम्

उक्तं च सप्तमस्कन्धे श्रीप्रह्लादेन (BhP 7.7.33)
एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे।
वासुदेवे भगवति यया संलभ्यते रतिः॥ ५२२॥

एकादशे श्रीनारदेन (BhP 11.2.12)
श्रुतो ऽनुपठितो ध्यात आदृतो वानुमोदितः
सद्यः पुनाति सद्धर्मो देवविश्वद्रुहो ऽपि हि॥ ५२३॥

तत्रैव श्रीकवियोगेश्वरेण (BhP 11.2.35)
यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित्।
धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह॥ ५२४॥

श्रीप्रबुद्धयोगेश्वरेण (BhP 11.3.33)
इति भागवतान्धर्मान्शिक्षन्भक्त्या तदुत्थया।
नारायणपरो मायामञ्जस्तरति दुस्तराम्॥ ५२५॥

श्रीभगवता च (BhP 11.19.24)
एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम्।
मयि सञ्जायते भक्तिः को ऽन्यो ऽर्थो ऽस्यावशिष्यते॥ ५२६॥

किं चाग्रे (BhP 11.29.20)
न ह्यङ्गोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि
मया व्यवसितः सम्यङ्निर्गुणत्वादनाशिषः॥ ५२७॥ इति॥

अलाभे सत्सभायास्तु शुश्रूषुं च निजालये।
देवालये वा शास्त्रज्ञः कीर्तयेद्भगवत्कथाम्॥ ५२८॥

अथ श्रीभगवल्लीलाकथाकीर्तनमाहात्म्यम्।

उक्तं च स्कान्दे श्रीभगवता अर्जुनं प्रति
मत्कथा कुरुते यस्तु वैष्णवानां सदाग्रतः।

इह भोगानवाप्नोति तथा मोक्षं न संशयः ॥ ५२९ ॥

प्रथमस्कन्धे (BhP 1.5.22) श्रीनारदेन
इदं हि पुंसस्तपसः श्रुतस्य वा
स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः ।
अविच्युतो ऽर्थः कविभिर्निरूपितो
यदुत्तमश्लोकगुणानुवर्णनम् ॥ ५३० ॥

किं च (BhP 1.3.35)
एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः ।
भवसिन्धुप्लवो दृष्टो हरिचर्यानुवर्णनम् ॥ ५३१ ॥

एकादशे श्रीशुकेनापि (BhP 11.31.28)
इत्थं हरेर्भगवतो रुचिरावतार
वीर्याणि बालचरितानि च शन्तमानि ।
अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो
भक्तिं परां परमहंसगतौ लभेत ॥ ५३२ ॥

अतव श्रीप्रह्लादेन नृसिंहस्तुतावुक्तम् (BhP 7.9.18)
सो ऽहं प्रियस्य सुहृदः परदेवताया
लीलाकथास्तव नृसिंह विरिञ्चगीताः ।
अञ्जस्तितर्म्यनुगृणन्गुणविप्रमुक्तो
दुर्गाणि ते पदयुगालयहंससङ्गः ॥ ५३३ ॥

गोपिकाभिरपि गीतम् (BhP 10.31.9)
तव कथामृतं तप्तजीवनं
कविभिरीडितं कल्मषापहम् ।
श्रवणमङ्गलं श्रीमदाततं
भुवि ग्र्णन्ति ते भुरिदा जनाः ॥ ५३४ ॥

कितर्नेऽप्यत्र तज्ज्ञेयं माहात्म्यं श्रवणेऽस्य यत् ।
सिध्यति श्रवणम्नूनं कीर्तनात्स्वयमेव हि ॥ ५३५ ॥
शास्त्राभ्यासस्य चाभावे पूर्वेषां लोकविश्रुताम् ।
सतामाधुनिकानां च कथां बन्धुषु कीर्तयेत् ॥ ५३६ ॥

इति श्रीगोपालभट्टविलिखिते श्रीभगवद्भक्तिविलासे

सत्सङ्गमो नाम दशमो विलासः ॥ १० ॥